वर्षम् 74
अङ्कः -08
ज्येष्ठमासः
विक्रमाब्दः 2081
युगाब्दः 5126
जून, 2024

ISSN 2249-698X

# भारती
## संस्कृत–मासपत्रिका

एकस्याः प्रतेः २५/-
वार्षिक-शुल्कम् २५०/-
पञ्चवार्षिकशुल्कम् ११००/-
पञ्चदशवार्षिकशुल्कम् ३१००/-

प्रकाशन प्रत्येक माह की 1 तारीख



# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | गङ्गावतरणम् | डॉ. नाथूलालसुमनः | ६ |
| ३ | श्रीमद्भगवद्गीतायां प्राकृतिकत्रैविध्यम् | डॉ. उषाकिरणयादवः | ९ |
| ४ | स्वतन्त्रतायास्तात्पर्यम् | डॉ. महेशचन्द्रशर्मा गौतमः | १३ |
| ५ | पराम्बाकृपाकाङ्क्षा | डॉ. रामनारायणझाः | १६ |
| ६ | अवर्णप्लुतोच्चारणविमर्शः | श्रीवत्सजैमनः | १७ |
| ७ | सम्पातिचरितम् | युगलकिशोरभारद्वाजः | १८ |
| ८ | भाषा-विज्ञान-विचारयोः ....... | डॉ. रणजीतकुमारझाः | २० |
| ९ | विस्थापनस्य कविताः | कौशलः तिवारी | २५ |
| १० | पत्रिकासमीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | २६ |
| ११ | आधुनिकसंस्कृतसाहित्यसङ्कलनपरियोजना | प्रधानसम्पादकः | २७ |
| १२ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २८ |
| १३ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३० |


**लेखकेभ्यो निवेदनम्** - कृपया स्वलेखान् 'चाणक्य Font' द्वारा टंकयित्वा अशुद्धिसंशोधनं च कृत्वा 'PDF' एवं 'Word' द्वारा प्रेषयन्तु।
**ग्राहकेभ्यो निवेदनम्** - किसी मास का अंक दिनाङ्क 10 तक प्राप्त न हुआ हो तो कृपया Whatsapp द्वारा चलदूरभाष सं. 93520 30291, 8005813613 (व्यवस्थापक) पर अपने नाम, पते सहित सूचना करें।

## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9799011085**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**

ISSN2249-698X

॥ श्रीशः ॥

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठम्, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठम् रेवासा )
महन्तः प्रतापपुरी
( तारातरामठम्, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्
प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्
अध्यक्षः
प्रोफेसर बनवारीलालगौडः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

केन्द्रीय संस्कृत विश्वविद्यालय ( शिक्षा मंत्रालय, भारत सरकार के अधीन ) के द्वारा संस्कृत पुस्तकों के प्रकाशनार्थ वित्तीय सहायता की योजना के तहत प्रदत्त वित्तीय सहायता से प्रकाशित।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाइट : www.bhartipatrika.org

वर्षम् 74 अङ्कः -08
ज्येष्ठमासः
विक्रमाब्दः 2081
युगाब्दः 5126
जून, 2024

एकस्याः प्रतेः 25/-
वार्षिकशुल्कम् 250/-
पञ्चवार्षिकशुल्कम् 1100/-
आजीवनसदस्यताशुल्कम् 3100/- ( 15 वर्षाणि )

सम्पादकीयम्

# श्रीमत्प्रतापराजानं नुमो बप्पा-सुवंशजम्

...✍ प्रोफेसर श्रीकृष्णशर्मा

सिसोदियाकुलावतंसो बप्पारावलवंशजो महाराणाप्रतापसिंहो विक्रमसंवत् 1597 संवत्सरस्य ज्येष्ठमासे शुभे शुक्लपक्षे तृतीयायां तिथौ रविवासरे, तदनुसारं 09 मई, 1540 ईशवीय-दिनाङ्के मेवाड़प्रान्ते कुम्भलगढ़-दुर्गस्थाने जनिं लब्ध्वा राजस्थानभूमिमलञ्चकार। माता चास्य **जयवन्ता** बाई पिता वै **उदयसिंह**-द्वितीयोऽभूताम्। अस्य प्रधानराजमहिषी **अजबदे बाई** पुनवार-नाम्नी अमरसिंह-नामानं वीरपुत्रमजीजनत्। होलिकोत्सवदिवसे (28 फरवरी, 1572 खीष्टाब्ददिवसे) पितरि दिवंगते 'गोगूँदा' इति प्रसिद्धस्थानेऽस्य राज्याभिषेकः सम्पन्नः।

तदानीं मुगलशासक 'अकबर' आसीत्। तदाक्रमणकारणात् मेदपाट (मेवाड़) राज्यस्य व्यवस्था सन्तोषावहा नासीत्। चित्तौड़-बदनौर-शाहपुरा-रायलाप्रभृति-मेवाड़प्रान्तस्य सीमान्तभागाः मुगलशासकाधीना आसन्। समस्यामिमां समाधातुं प्रतापसिंहस्य मस्तिष्के द्वावेव मार्गावास्ताम्। **प्रथम**स्तावद् अकबरसमक्षम् आत्मनः समर्पणं कृत्वा मुगलव्यवस्थाया अङ्गभूतः सन् प्रणष्टराज्यभागं पुनरवाप्य च सौविध्येन जीवेत्। **द्वितीय**स्तावत्-स्वायत्तं स्वतन्त्रराज्यं रक्षित्वा मातृभूमेर्गौरवं प्रतिष्ठापयेत्। मार्गोऽयं प्रतिष्ठाप्रदः, परं सुकरो नासीत्। मार्गेऽस्मिन् प्रतिदिनं घातकयुद्धानां प्रतिकारोऽपरिहार्यः। तथापि कुलीनसंस्कारवशाद् महाराणा प्रतापसिंहो मुगलैः सह संघर्षात्मकं द्वितीयं मार्गमेव चितवान्।

सद्य एव स सामन्तानां भीलजनानाञ्च सङ्घमेकं स्थापितवान् योऽनवरतं देशरक्षार्थं समुद्यतो भवेत्। 'भील' जनान् स्वकीय-सैन्यव्यवस्थायां समुचित-सम्मानजनकपदैरप्यलञ्चकार।

1573 खीष्टाब्दे मुगलशासकस्याकबरस्यादेशानुसारं मानसिंहो महाराणाप्रतापसिंहस्य समीपं गतवान् प्रायतिष्ट च तं बोधयितुं यत् सोऽकबरस्य सर्वोच्चसत्तामङ्गीकृत्य राजद्वारि समुपतिष्ठेत्। प्रतापस्तु न स्वीचकारेमं प्रस्तावम्। मेदपाटस्य स्वतन्त्रतां विध्वंसितुमभिनिविष्ट आसीदकबरः, प्रतापस्तु तद्रक्षितुं कृतनिश्चयः। परिणामतो 'हल्दीघाटीयुद्धम्' बभूव।

अकबरशासकः सर्वोच्चसेनापतिं मानसिंहमादिदेश यद् मेवाड़धरायाः सैन्यशक्तिविनाशार्थं महाराणाप्रतापो जीवितो वा मृतो वा निगृह्य आनेतव्यः।

21 जून 1576 ईशवीयदिनाङ्के प्रातरेव युद्धभेरीनादो तुमुलोऽभवत्। मानसिंहः प्रतापसिंहश्च मुखामुखि बभूवतुः। प्रतापो मानसिंहोपरि प्राणघातमाक्रमत्। मानसिंहो यथाकथञ्चित् सुरक्षितोऽभूत्। परमस्मिन् संग्रामे राणाप्रतापस्य प्रियो घोटकः '**चेतकः**' छिन्नैकपादो महाराणं संरक्ष्य

समराङ्गणतो बहिरागतः। अनन्तरम् अद्रिद्रोण्याः (घाटी) अपरस्यां सीमायां चेतको निष्प्राणो बभूव। राणाप्रतापः प्रियघोटकाय श्रद्धाञ्जलीन् आर्पिपत्। मानसिंहः सेनाभिः सह राजद्वारे यदा युद्धाद् न्यवर्तत, अकबरस्तस्योपेक्षां व्यधात्।

13 अक्टूबर, 1576 दिनांके स्वयं मुगलशासकोऽकबरो 'गोगुन्दे' समागच्छत्, परं प्रतापसिंहेन सह साम्मुख्यं नाभवत्, युद्धेन विनैव स प्रतिनिवृत्तः। अनन्तरम् अकबरप्रायोजितानामनेकेषाम् आक्रमणानां धैर्येण प्रतापः प्रतिकारमकरोत्। चित्तौड़दुर्गं माण्डलदुर्गञ्च विहाय पूर्वं पराजितां भूमिं पुनः स्वाधीनामकृत।

1585 ईशवीयाब्दतः 1597 ईशवीयाब्दं यावद् (यावज्जीवम्) मुगलशासकाःप्रतापसिंहस्य पराक्रमं शौर्यं चातुर्यञ्च विज्ञाय युद्धात् पराङ्मुखा अभूवन्। 1585 खीस्ताब्द एव महाराणेन दक्षिणपर्वतीयभागे '**चावण्ड**' नाम्नि उपनगरे नूतनां राजधानीं प्रातिष्ठिपत् यत्र विशालमुगलसेनायाः प्रवेशो दुष्कर इवासीत्। शान्तिकालेऽस्मिन् प्रतापोऽथकपरिश्रमेण स्वराज्ये सुव्यवस्थां स्थिरीकृतवान्।

अनवधानतयैकदा धनुर्बाणयोरसन्तुलितप्रयोगात् स्वयमेव क्षतोऽभूत्। पर्यन्ते 19 जनवरी, 1597 दिनांके (1653 वैक्रमाब्दस्य माघमासे) राजा राणा प्रतापसिंहो दिवङ्गतः। चावण्डराजधानीं निकषा 'बाण्डोली' ग्रामान्नातिदूरं प्रवहमानाया '**केजड़**' नद्यास्तीरेऽग्निसंस्कारस्तस्य सम्पन्नः। तत्रैवेदानीमपि स्मारको वर्तते।

प्रतापसिंहस्य मृत्योर्वृत्तान्तं श्रुत्वाऽकबरोऽपि निःश्वासपूर्वकमश्रूणि तत्याज यतो वीरप्रतापसिंहो न कस्यापि समक्षं नतमस्तको बभूव।

प्रतापसिंहः पञ्चविंशतिवर्षाणि यावत् प्रजायाः सन्नेतृत्वमकार्षीत्। शौर्यादिसद्गुणैः प्रजासु सौहार्दं श्रद्धाञ्चार्जत्। यावज्जीवं शत्रून् भयाकुलान् विधाय प्रजाजनाँश्च आशावादिनो कृतवान्। प्रथमोऽयं स्वतन्त्रतासेनानीरित्यभिधातुं शक्यते। एतत्समये संस्कृतभाषायाः समुन्नतिः सञ्जाता। राजसं वैभवं विहाय साधारणजीवनं स यापितवान्। किमधिकं, स्वस्य पर्वतीयजीवनकाले महाराण-प्रतापः परिवारेण सह नैकान् दिवसान् यावत् लौहकार-गृहमध्युषितवान् भूमिदानञ्च तस्मै कृतवान्। ताम्रपत्रमत्र प्रमाणम्। **ज्येष्ठमासस्य शुक्लपक्षीयतृतीयायाम्** अस्य महामानवस्य **जयन्त्यवसरे** वयं सश्रद्धं तं प्रणमामः।

– **सम्पादकः**

जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालये

संस्कृतविभागाध्यक्षचरः,

जयपुरस्थ-जगद्गुरु-रामानन्दाचार्य- राजस्थान-संस्कृत-विश्वविद्यालये व्याकरणपीठाध्यक्षचरश्च।

दूरभाषाङ्कः 8386943655

# गङ्गावतरणम्

❑ डॉ. नाथूलालसुमनः

ज्येष्ठशुक्लदशमी तिथिः '**गङ्गादशमी**' अथवा 'गङ्गादशहरा' इति कथ्यते। अस्मिन् दिने गङ्गा स्वर्गात् धरायामवतरिता इति स्वीक्रियते। एषा गङ्गावतरणकथा श्रीमद्वाल्मीकीयरामायणस्य बालकाण्डे ३५ तमसर्गात् ४४ तमसर्गपर्यन्तम् आगता।

रामलक्ष्मणौ राक्षसान् हत्वा विश्वामित्रस्य यज्ञम् अरक्षताम्। तदनन्तरं विश्वामित्रस्य आज्ञया ऋषिभिः सह तौ अपि मिथिलां प्रस्थितौ। मिथिलामार्गे ते सर्वे प्रथमरात्रौ शोणभद्रनद्यास्तटे विश्रम्य द्वितीयदिवसे गङ्गातटं प्राप्तवन्तः।

गङ्गातट एव श्रीरामो विश्वामित्रम् अपृच्छत्-

**भगवञ्छ्रोतुमिच्छामि गङ्गां त्रिपथगां नदीम्।**
**त्रैलोक्यं कथमाक्रम्य गता नदनदीपतिम्।।**
(वा.रा.बाल./३५/१२)

तत्पश्चात् विश्वामित्रः गङ्गायाः जन्मकथाम् एवं प्रारब्धवान्। मेरुपुत्री मेना हिमालयस्य पत्नी अस्ति। तस्यां हिमवान् कन्याद्वयं प्राप्तवान्, तयोः गङ्गा ज्येष्ठा अस्ति उमा च कनिष्ठा। देवकार्यसिद्ध्यर्थं देवाः गङ्गां हिमवन्तम् अयाचन्त। हिमवानपि गङ्गां ददौ। देवाः गङ्गामादाय स्वर्लोकमगच्छन्। गच्छता कालेन शिवस्य क्षुभितं तेजः क्रमशः पृथिवी अग्निः गङ्गा च अधारयन्। तत्तेजः कार्त्तिकेयरूपेण देवसेनापतित्व-मङ्गीचकार।

कपिलेन मुनिना भस्मराशीकृतानां राज्ञः सगरस्य षष्टिसहस्रपुत्राणां गङ्गायां सलिलक्रियां कर्तुं वैनतेयः सगरपौत्रम् अंशुमन्तम् आज्ञापयत् -

**गङ्गा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ।**
**तस्यां कुरु महाबाहो पितॄणां सलिलक्रियाम्।।**
**भस्मराशीकृतानेतान् प्लावयेल्लोकपावनी।**
**तथा क्लिन्नमिदं भस्म गङ्गया लोककान्तया।।**
**षष्टिं पुत्रसहस्राणि स्वर्गलोकं गमिष्यति।।**
(वा.रा.बाल./४१/१९-२०)

अनन्तरमंशुमतः पौत्रो भगीरथो गङ्गावतरणाय दीर्घं तपस्तेपे। तस्य सुतप्तेन तपसा प्रीतो भगवान् ब्रह्मा वरं वरयितुम् अवोचत्। भगीरथ उवाच -

**गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम्।**
**स्वर्गं गच्छेयुरत्यन्तं सर्वे च प्रपितामहाः।।**
**देव याचे ह संतत्यै नावसीदेत् कुलं च नः।**
**इक्ष्वाकूणां कुले देव एष मेऽस्तु वरः परः।।**
(वा.रा.बाल./४२/१९-२०)

'एवं भवतु' इत्युक्त्वा ब्रह्मा आदिष्टवान् - राजन् गङ्गायाः पतनं पृथिवी न सहिष्यते अतएव तां धारयितुं शिवः नियुज्यताम्। भगीरथमनुगृहीतुं गङ्गामपि आदिश्य ब्रह्मा स्वर्गलोकं जगाम। भगीरथः पुनरपि वर्षं यावत् समुपासत। तस्य तपसा प्रीतः शिवः

गङ्गां शिरसा धारयितुं स्व्यकरोत् -

**प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि तव प्रियम्।**
**शिरसा धारयिष्यामि शैलराजसुतामहम्।।**

(वा.रा.बाल./४३/३)

तदा स्रोतसा शिवमपि गृहीत्वा अहं पातालं प्रविशामि इति विचिन्त्य गङ्गा दुःसहं वेगं कृत्वा आकाशात् शिवशिरसि अपतत्। गङ्गाया अहंकारं ज्ञात्वा क्रुद्धः शिवः तां तिरोभावयितुं बुद्धिं चकार। अत एव शिवस्य जटामण्डले पतिता गङ्गा कथंचिदपि पृथिवीं गन्तुं नाशक्नोत्। सा तत्रैव बहून् संवत्सरगणान् अभ्रमत्। गङ्गामपश्यन् भगीरथः पुनः परमं तपः आचरितवान्। तस्य तपसा संतुष्टः शिवः गङ्गां विससर्ज। विसृज्यमाना गङ्गा सप्तधारासु विभक्ता। तासु सप्तमी धारा भगीरथरथम् अन्वगात् -

**विससर्ज ततो गङ्गां हरो बिन्दुसरः प्रति।**
**तस्यां विसृज्यमानायां सप्त स्रोतांसि जज्ञिरे।।**
**ह्लादिनी पावनी चैव नलिनी च तथैव च।**
**तिस्रः प्राचीं दिशं जग्मुर्गङ्गाः शिवजलाः शुभाः।।**
**सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी।**
**तिस्रश्चैता दिशं जग्मुः प्रतीचीं तु दिशं शुभाः।।**
**सप्तमी चान्वगात् तासां भगीरथरथं तदा।**
**भगीरथोऽपि राजर्षिर्दिव्यं स्यन्दनमास्थितः।।**
**प्रायादग्रे महातेजा गङ्गा तं चाप्यनुव्रजत्।**
**गगनाच्छंकरशिरस्ततो धरणिमागता।।**

(वा.रा.बाल./४३/११-१५)

इमम् अद्भुतं गङ्गावतरणं द्रष्टुं देवर्षिगन्धर्वा यक्षसिद्धगणाश्च समागताः। भगीरथः दिव्यं रथमास्थितः अग्रे प्रायात् पृष्ठतः गङ्गा तं अन्वगात्। नैके जीवाः गङ्गाजलं पीत्वा तत्राभिषेकमपि कृतवन्तः -

**तत्रर्षिगणगन्धर्वा वसुधातलवासिनः।।**
**भवाङ्गपतितं तोयं पवित्रमिति पस्पृशुः।**
**शापात् प्रपतिता ये च गगनाद् वसुधातलम्।।**
**कृत्वा तत्राभिषेकं ते बभूवुर्गतकल्मषाः।**
**धूतपापाः पुनस्तेन तोयेनाथ शुभान्विताः।।**
**पुनराकाशमाविश्य स्वाँल्लोकान् प्रतिपेदिरे।**
**मुमुदे मुदितो लोकस्तेन तोयेन भास्वता।।**

(वा.रा.बाल./४३/२६-२९)

सर्वे देवर्षिदैत्यदानवराक्षसगन्धर्वयक्षकिंनरोरगसर्पाप्सरसो जलचराश्च प्रीताः गङ्गामन्वगमन्। मार्गे यजमानस्य जह्नोः यज्ञवाटं गङ्गा सम्प्लावयामास। गङ्गाया अनेन कर्मणा क्रुद्धः जह्नुः तस्याः सर्वं जलमपिबत्। ततो देवर्षिगन्धर्वाः जह्नुं पूजयित्वा गङ्गां तस्य दुहितृत्वे नीतवन्तः। ततः सन्तुष्टो जह्नुः गङ्गां श्रोत्राभ्यामसृजत्। अतएव गङ्गा जह्नुसुता **जाह्नवीति** प्रोच्यते। पुनः भगीरथरथमनुगच्छन्ती गङ्गा सागरं सम्प्राप्ता। गंगयानुगतः भगीरथः सागरं गत्वा भूमेः तलं प्रविवेश यत्र तस्य प्रपितामहाः सगरपुत्राः भस्मसात्कृताः। गङ्गासलिलं भस्मनां राशिं प्लावयत्। गङ्गासलिलेन भस्मनि आप्लुते ब्रह्मा प्रकटीभूय भगीरथमब्रवीत् -

तारिता नरशार्दूल दिवं याताश्च देववत्।
षष्टिः पुत्रसहस्राणि सगरस्य महात्मनः।।
सागरस्य जलं लोके यावत्स्थास्यति पार्थिव।
सगरस्यात्मजाः सर्वे दिवि स्थास्यन्ति देववत्।।
इयं च दुहिता ज्येष्ठा तव गङ्गा भविष्यति।
त्वत्कृतेन च नाम्नाथ लोके स्थास्यति विश्रुता।
गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च।
त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता।।
वा.रा.बाल./४४/३-६

ब्रह्मणः आज्ञया भगीरथोऽपि गङ्गाजले स्नात्वा सर्वेषां पितामहानां सलिलक्रियां च कृत्वा स्वपुरं प्रविवेश। अन्ते च वाल्मीकिना गङ्गावतरणमाहात्म्यं वर्णितम् -

धन्यं यशस्यमायुष्यं पुत्र्यं स्वर्ग्यमथापि च।
यः श्रावयति विप्रेषु क्षत्रियेष्वितरेषु च।।
प्रीयन्ते पितरस्तस्य प्रीयन्ते दैवतानि च।
इदमाख्यानमायुष्यं गङ्गावतरणं शुभम्।।
यः शृणोति च काकुत्स्थ सर्वान् कामानवाप्नुयात्।
सर्वे पापाः प्रणश्यन्ति आयुः कीर्तिश्च वर्धते।।
(वा.रा.बाल./४४/२१-२३)

उत्तराखण्डप्रान्ते गङ्गोत्रीतः देवप्रयागपर्यन्तं '**भागीरथी**' अनन्तरं च '**गङ्गा**' इत्युच्यते। देवप्रयाग एव भागीरथ्यलकनन्दयोः सङ्गमः भवति। श्रीमच्छङ्कराचार्यविरचितं गङ्गास्तोत्रमपि सुप्रसिद्धमेव -

**देवि सुरेश्वरि भगवति गङ्गे!**
**त्रिभुवनतारिणि तरलतरङ्गे!**
**शङ्करमौलिविहारिणि विमले!**
**मम मतिरास्तां तव पदकमले।।** इति।

उपाध्यक्षः, भारतीयसंस्कृतप्रचारसंस्थानम्


# ऐसे बन सकते हैं आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 250/-, पंचवर्षीय शुल्क 1100/-, आजीवन सदस्यता ( 15 वर्ष ) शुल्क 3100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या - **21391019 12498**
**IFS Code - CNRB0002139**

# श्रीमद्भगवद्गीतायां प्राकृतिकत्रैविध्यम्

❑ डॉ. उषाकिरणयादवः

श्रीमद्भगवद्गीतायाः षोडशतमेऽध्याये शरणागतं शिष्यमर्जुनं श्रीगुरुः साररूपे उपदिदेश यद् यः जनः शास्त्रानुकूलं नाचरति, स्वच्छन्दाचरणं करोति, सः न सिद्धिं न सुखं न च परमगतिं प्राप्नोति, अतस्त्वया कार्याकार्यस्य निर्धारणे शास्त्रं प्रमाणमङ्गीकृत्य शास्त्रनियमानुसारं कर्म करणीयम्।[१] उपदेशमिमं श्रुत्वा सप्तदशाध्याये अर्जुनः पप्रच्छ श्रीगुरुं यद् ये जनाः शास्त्रविधिं परित्यज्यं श्रद्धया केषाञ्चित् पूजां कुर्वन्ति तेषां श्रद्धा कीदृशी भवति- सात्त्विकी राजसी तामसी वा।[२] प्रश्नस्यास्योत्तरं दत्त्वा जगद्गुरुः अन्येषामपि प्रमुखपदार्थानां प्राकृतिक-त्रैविध्यस्य ज्ञानं ददौ प्रियशिष्याय। इदं समग्र-वर्णनमधो-लिखितरूपे इत्थमस्ति -

शिष्यस्य प्रश्नोत्तररूपे श्रीगुरुः जगाद यत् पुरुषाणां श्रद्धा त्रिविधा भवति - सात्त्विकी राजसी तामसी च। त्रिधैषा श्रद्धा स्वभावजाऽस्ति।[३] श्रद्धेयं तेषामन्तःकरणानुरूपा भवति यतः पुरुषः श्रद्धामयो भवति, यस्य यादृशी श्रद्धा भवति सः तादृश एव जायते।[४] अर्थात् सात्त्विकश्रद्धायुक्ताः सात्त्विकाः राजसश्रद्धा-युक्ताः राजसाः तामसश्रद्धान्विताश्च जनाः तामसाः भवन्ति। त्रिविधानां जनानां पूजाश्रितलक्षणनामानि सन्ति-सात्त्विकाः देवान् यजन्ति, राजसाः यक्ष-राक्षसानर्चन्ति तामसाश्च भूतप्रेतानां पूजां कुर्वन्ति।[५]

आसुरस्वभावयुक्तानामन्यानि लक्षणान्येतानि कथितानि-ते शास्त्रविधिरहितं घोरं तपः कुर्वन्ति, दम्भाहंकारयुक्ताः भवन्ति, कामरागबलाभिमानयुक्ताः भवन्ति, अज्ञानिनस्ते शरीरे स्थितं भूतसमुदायं क्षीणं कुर्वन्ति हृदये संस्थितमात्मानञ्च क्लिश्नन्ति।[६] अन्यपदार्थेषु श्रीगुरुः आहारयज्ञतपोदानानामुपदेशं ददौ-

**आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।**
**यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु[७]।।**

**आहारभेदाः**

सात्त्विकप्रिया आहाराः - आयुर्बुद्धिबलारोग्यसुख-प्रीतिवर्धकाः रसान्विताः स्नेहयुक्ताः स्थिराः हृदयानुकूला आहाराः सात्त्विकजनस्य प्रियाः भवन्ति।[८]

राजसस्येष्टाहाराः - कट्वम्ललवणात्युष्णास्तीक्ष्ण-रुक्षदाहकाः राजसजनस्य दृष्टाः भवन्ति।[९] एते दुःखशोकरोगकारकाः भवन्ति।[९]

तामसप्रियाहाराः - व्यतीतयाम-रसहीन-दुर्गन्धयुक्त-पर्युषितोच्छिष्टा अपवित्राहारा तामसजनस्य प्रिया भवन्ति।[१०]

**यज्ञभेदाः**

सात्त्विकयज्ञः - यज्ञकरणं कर्त्तव्यमस्तीति भावेन फलेच्छारहितैर्मनुष्यैः विधिविधानेन मनोयोगपूर्वकं कृतः यज्ञः सात्त्विको भवति।[११]

राजसयज्ञः - दम्भार्थं फलेच्छया च कृतः यज्ञः राजसो भवति।[१२]

तामसयज्ञ: - शास्त्रविधिविहीन अन्नदानरहित: मन्त्रदक्षिणाहीन: श्रद्धारहितो यज्ञस्तामसो भवति।[१३]

**तपोभेदा:**

ग्रन्थे गुणत्रयाधारितभेदकथनात्पूर्वं तपस त्रयो भेदा कथिता: - शारीरं तप: वाचिकं मानसं तपश्च।

देवद्विजगुरुप्राज्ञजनानां पूजा शुचिता सरलता ब्रह्मचर्यमहिंसा च शारीरं तप: कथ्यते।[१४]

अनुद्वेगकारि सत्यं प्रियं हितकारि च वच: स्वाध्याभ्यासौ वाचिकं तपो भवति।[१५]

मनस: प्रसन्नता सौम्यता मौनमात्मसंयमो भावानां संशुद्धिश्च मानसं तप उच्यते।[१६]

त्रिविधन्तप: पुन: त्रिविधं भवति-सात्त्विकं राजसं तामसञ्च।

सात्त्विकं तप: - फलेच्छारहितै: पुरुषै: परया श्रद्धया तप्तं तप: सात्त्विकमुच्यते।[१७]

राजसं तप: - सत्कारसम्मानपूजार्थं दम्भेन च कृतम-स्थिराल्पफलयुक्तन्तप: राजसं भवति।[१८]

तामसं तप: - मूर्खताश्रितहठेनात्मन: पीडया परस्य वाऽनिष्टार्थं क्रियमाणन्तपस्तामसं भवति।[१९]

**दानभेदा:**

सात्त्विकदानम् - यद्दानं कर्त्तव्यभावनया देशकालपात्राणामौचित्यानुरूपं दीयते, यस्मिंश्च प्रत्युपकारस्य भावो न भवति तत् सात्त्विकदानं कथ्यते।[२०]

राजसदानम् - प्रत्युपकाराय फलेच्छया वा क्लेशपूर्वकञ्च दत्तन्दानं राजसं भवति।[२१]

तामसदानम् - देशकालपात्राणामयोग्यतापूर्वकं दत्तं तिरस्कारपूर्वकञ्च दानं तामसं भवति।[२२] श्रीगुरु: ज्ञान- कर्मकर्त्ताबुद्धिधृतिसुखानां त्रैविध्यस्योपदेशं ददौ स्वस्य प्रियशिष्यायाष्टादशाध्याये।तथा हि-

**ज्ञानभेदा:**

सात्त्विकज्ञानम् - येन ज्ञानेन विभक्तेषु सर्वेषु भूतेष्वविभागमेकं अव्ययं परमात्मतत्त्वं दृश्यते तज्ज्ञानं सात्त्विकं भवति।[२३]

राजसज्ञानम् - येन ज्ञानेन पृथग्विधा नाना भावा:[२४] पृथक्त्वेन ज्ञायन्ते तज्ज्ञानं राजसं भवति।

तामसज्ञानम् - येन ज्ञानेन कार्यरूपे शरीरे एव सम्पूर्णे इवासक्तिर्भवति यच्च युक्तिरहितं तत्त्वार्थरहितं भवति तज्ज्ञानं तामसमुच्यते।[२५]

**कर्मभेदा:**

सात्त्विककर्म - शास्त्रानुकूलं कर्तृत्वाभिमानरहितं फलेच्छाविहीनं रागद्वेषराहित्येन कृतं कर्म सात्त्विकं भवति।[२६]

राजसकर्म - भोगेच्छयाऽहङ्कारेण वा बहुना परिश्रमेण कृतं कर्म राजसमुच्यते।[२७]

तामसकर्म - यत्कर्म परिणामहिंसाक्षयमविचार्य बलस्यानुरूपञ्च न क्रियते अज्ञानेनारभ्यते यत्तत् कर्म तामसमुच्यते।[२८]

**कर्तृभेदा:**

सात्त्विककर्त्ता - य आसक्त्यहङ्काररहित: धैर्यो-त्साहसमायुक्त: सिद्धावसिद्धौ च सम: भवति स: सात्त्विककर्ता कथ्यते।[२९]

राजसकर्ता - आसक्तियुक्तः कर्मफलेच्छुकः लोभी हिंसकोऽशुचिः हर्षशोकलिप्तः राजसकर्ता भवति।[३०]

तामसकर्ता - अयुक्तः ज्ञानरहितोऽभिमानी शठः विनाशक आलस्यान्वितः विषादयुक्तः दीर्घसूत्री च कर्ता तामसो भवति।[३१]

**बुद्धिभेदाः**

सात्त्विकी बुद्धिः - यया बुद्ध्या प्रवृत्तिः निवृत्तिः कार्याकार्ये भयाभये बन्धः मोक्षश्च ज्ञायन्ते सा सात्त्विकी भवति।[३२]

राजसी बुद्धिः - यया धर्माधर्मौ कर्त्तव्याकर्त्तव्ये च यथावत् न ज्ञायन्ते सा राजसी बुद्धिःकथ्यते।[३३]

तामसी बुद्धिः - तमस्सहिता या बुद्धिः अधर्मं धर्मं सर्वान् पदार्थांश्च विपरीतान् मन्यते सा तामसी भवति।[३४]

**धृतिभेदाः**

सात्त्विकी धृतिः - ययाव्यभिचरिण्या धृत्या मनुष्यः योगेन मनसः प्रणानामिन्द्रियाणां च क्रियाः धारयते सा सात्त्विकी भवति।[३५]

राजसी धृतिः - फलेप्सुः मानवः यया धृत्यात्या-सक्त्या धर्मकामार्थान् धारयते सा राजसी भवति।[३६]

तामसी धृतिः - दुर्बुद्धिजनः यया धृत्या निद्राभय-चिन्ताविषादान् न त्यजति सा धृतिः तामसी कथ्यते।[३७]

**सुखभेदाः**

सात्त्विकं सुखम् - यस्मिन् सुखे ध्यानभजनसेवादे-रभ्यासाद् रमते दुःखविनाशञ्चाधिगच्छति, यदारम्भे विषमिव परिणामे चामृतसदृशं भवति, ईदृशमात्म-केन्द्रितबुद्धेः कृपया जातं सुखं सात्त्विकं भवति।[३८]

राजसं सुखम् - यत्सुखं विषयेन्द्रियसंयोगजन्यं भवति, यदग्रेऽमृतसदृशमन्ते च विषमिव जायते तत्सुखं राजसमुच्यते।[३९]

तामसं सुखम् - यत्सुखमारम्भेऽन्ते चात्मानं मुह्यति तन्निद्रालस्यप्रमादजन्यं सुखं तामसं भवति।[४०] जगद्गुरुप्रदत्तमिदं प्राकृतिकत्रिविधतापरकं ज्ञानं मानवमात्रस्य कृतेऽतिमहत्त्वपूर्णमस्ति। ज्ञानेनानेन मनुष्याणां पदार्थानाञ्च यथार्थमभिज्ञानं कर्तुं शक्यते, गुणेषु सामञ्जस्य-परस्परोपकार-परिष्काराणां प्रयासा अपि कर्तुं शक्यन्ते।

- सेवानिवृत्ता आचार्या, (संस्कृते)
सेमुभा. राजकीयस्नातकोत्तरकन्यामहाविद्यालयात्,
भीलवाड़ा नगरात् (राजस्थानम्)
चलदूरभाषाङ्कः - ९४१४८१२१०५

सन्दर्भः-

१. यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।।
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि।।
श्रीमद्भगवद्गीता, १६/२३-२४

२. ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विता।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः।।

३. त्रिविधा भवति श्राद्धा देहिनां सा स्वभावजा।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु।। तत्रैव, १७/२

४. सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः। तत्रैव, १७/३

५. यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः। तत्रैव, १४/४

६. अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः।।
कर्शयन्तः शरीरस्थं भूतग्राममचेतसः।
मां चैवान्तः शरीरस्थं तान्विद्ध्यासुरनिश्चयान्।तत्रैव, १७/५६

७. तत्रैव, १७/७

८. आयुः सत्वबलारोग्यं सुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः।। तत्रैव, १७/८

९. कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः।। तत्रैव, १७/९

१०. यातयामं गतरसं पूति पर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।। तत्रैव, १७/१०

११. अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः।। तत्रैव, १७/११

१२. अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्।। तत्रैव, १७/१२

१३. विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते।। तत्रैव, १७/१३

१४. देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।तत्रैव, १७/१४

१५. अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते तत्रैव, १७/१५

१६. मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते।तत्रैव, १७/१६

१७. श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते।तत्रैव, १७/१७

१८. सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्।तत्रैव, १७/१८

१९. मूढग्राहेणात्मनो यत्पीडया क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्।तत्रैव, १७/१९

२०. दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्।तत्रैव, १७/२०

२१. यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्।तत्रैव, १७/२१

२२. अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम्।तत्रैव, १७/२२

२३. सर्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्।तत्रैव, १८/२०

२४. पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान्।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्।तत्रैव, १८/२१

२५. यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम्।तत्रैव, १८/२२

२६. नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते तत्रैव, १८/२३

२७. यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम्।तत्रैव, १८/२४

२८. अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते।तत्रैव, १८/२५

२९. मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योः निर्विकारः कर्ता सात्त्विक उच्यते।तत्रैव, १८/२६

३०. रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः।तत्रैव, १८/२७

३१. अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते।तत्रैव, १८/२८

३२. प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी।तत्रैव, १८/३०

३३. यया धर्ममधर्मं च कार्यं चाकार्यमेव च।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी।तत्रैव, १८/३१

३४. अधर्मं धर्ममिति या मन्यते तमसावृता।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी।तत्रैव, १८/३२

३५. धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी।तत्रैव, १८/३३

३६. यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी।तत्रैव, १८/३४

३७. यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी।तत्रैव, १८/३५

३८. अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति।
यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्।तत्रैव, १८/३६-३७

३९. विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम्।
परिणामे विषमिव तत्सुखं राजसं स्मृतम्।तत्रैव, १८/३८

४०. यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्।तत्रैव, १८/३९

क्रमशः

# स्वतन्त्रतायास्तात्पर्यम्

❑ डॉ. महेशचन्द्रशर्मा गौतमः
(साहित्याकादेम्या पुरस्कृतः)

सम्राजो बहादुरशाहस्यानुज्ञया व्यवसायिरूपेण भारतं प्रविष्टा आङ्ग्लाः कपटेन तस्य राज्यमधिजगृहुः। सम्प्रति त एवाङ्ग्ला आत्मनः स्वामिनं बहादुरशाहं राजद्रोहेणाभिशशंसुः। राजद्रोहस्याभिशंसनं याथार्थ्येन त्वाङ्ग्लानां विरुद्धमपेक्षितमवर्तिष्ट परमितिहासस्य पुनरावृत्तिस्तु प्रायो भवत्येव। पूर्वं यवना भारतमवस्कत्यास्य राज्यानां शासनमधिजगृहुः, कालान्तरे च व्यवसायस्य व्यपदेशेन भारतं प्रविष्टा आङ्ग्ला मुगलवंशस्य शासकं बहादुरशाहं राजद्रोहेणाभिशंस्य रङ्गूनस्य कारागारे प्रचिक्षिपुः। १८५७तमे संवत्सरे सितम्बरमासस्य विंश्यां तिथौ आङ्ग्लशासकाः कपटप्रबन्धेन बहादुरशाहं वन्दिनं विधाय तस्य समक्षमेव तस्य द्वौ पुत्रौ पौत्रञ्च त्यक्तजीवितान् विधाय दिल्लीमधिजगृहुः।

एवं १८५७तमे वर्षे संवृत्तः स्वतन्त्रतासंग्रामोऽवितथमेवासिद्धार्थोऽस्थात्परं नियतमेव सा समुत्पत्तिराङ्ग्लानां शासनमामूलमान्दूदुलत्। बहादुरशाहस्य रङ्गूनस्य कारागारे आसेधानन्तरं भारते मुगलशासनस्याध्यायः समाप्तोऽभूत्। पराजितायाः ईष्टेण्डियाकम्पन्याः शासनमपि समाप्तं बभूव। १८५८तमे संवत्सरे नवम्बरमासस्य प्रथमे दिवसे आङ्ग्लानां साम्राज्ञी भारतस्य शासनमधिजगृहे। सातिशयं दीर्घा वर्तते भारतस्य पारतन्त्र्यकथा। मुहम्मदबिनकासिमाद्या अरबवंशजा मुहम्मदगजनबीप्रभृतयस्तुर्काश्चङ्गेजखानाद्या मङ्गोला बाबराद्या मुगलवंशजाश्चानुपूर्व्येणावस्कत्य भारतस्य पारतन्त्र्यस्य प्रभवा अवर्तिषत। व्यवसायस्य व्यपदेशेन भारतं प्रविष्टेष्टेण्डियाकम्पनी मुगलशासकेभ्यः शासनमपाहार्षीत्। सम्प्रत्याङ्ग्लानां साम्राज्ञी पराजितायाः ईष्टेण्डियाकम्पन्या अपि भारतस्य शासनमधिजग्राह। ते सर्वे आनुपूर्व्येण भारतमलुलुण्ठन्।

**टिप्पणी :** अभिशशंसुः – आरोप लगाया।

१८६३तमे संवत्सरे पञ्जाबराज्ये कूकेत्यभिधेयाः पराक्रमिणो योद्धारोऽप्याङ्ग्लानां विरुद्धमुच्चैः स्वरेण विद्रोहं प्रदर्शयाञ्चक्रुः। आङ्ग्लशासकाः शतशः कूकावीरान् गोलिकाभिरव्यात्सुनैकांश्चोद्बन्धनैस्त्यक्तजीवितान् विधाय तेषामान्दोलनं ममृदुः। नैकधाऽऽङ्ग्लशासकानां विरुद्धं संवृत्तेष्वान्दोलनेषु सातिशयं गुर्वर्थं ववृते कूकावीराणामान्दोलनम्। वस्तुतः स्वातन्त्र्यार्थमाङ्ग्लानां विरुद्धमान्दोलनमवर्तिष्ट शोषितानां

भारतस्य प्रजानां स्वाभाविकी प्रतिक्रिया। वस्तुतः स्वातन्त्र्यकामना भवति प्राणिमात्रस्य प्रकृतौ विद्यमाना स्वाभाविकी प्रवृत्तिः। प्रकृत्या स्वतन्त्राणां भारतीयानां शोषणमात्मनोऽधिकारं मन्यमाना आङ्ग्ला निरन्तरमत्याचारैरत्रत्याः प्रजाः पीडयाञ्चक्रुः।

आङ्ग्ला व्यवसायिनो भारतस्य कृषकान् साधिकारं बलपूर्वञ्च निर्दिश्य नीलस्य कृषिं कर्तुं प्राववर्तन्। नीलस्य कृषिः कृषकाणां भूम्या ऊर्वरत्वमचिक्षयत् तेषां भूमिञ्चावकेशिनीं व्यधात्। नीलस्य कृषिफलेन च ते नगण्यमेव मूल्यमवापन्। आङ्ग्ला व्यापारिणोऽकृतापराधान् निर्धनान् कृषकान् जघन्यवृत्तीनात्मनो जनान् निर्दिश्य वेत्राघातैरतीतडन् तेषां महिला बालकांश्च वन्दिनो विधाय विविधैरत्याचारैस्तेषां शोषणमकार्षुः। नाडियामण्डलस्य वीरदिगम्बरस्य विष्णुविश्वासस्य च नेतृत्वे कृषका आङ्ग्ल-व्यवसायिनां नीलमुत्पादयितुं दण्डसङ्कल्पप्रदर्शनपूर्वमपि कृतं निर्देशं प्रत्याचख्युः। क्षुब्धा आङ्ग्ला शतसंख्यकैः कृष्णकर्मभिर्यष्टिधारिभिर्गुरुण्डैः सह कृषकेष्वाक्रमिषुः। कृषका अपि यष्टिकाच्छुरिकाद्यैर्यथोपलब्धैः शस्त्रैः सहाक्रमणकारिणो गुरुण्डान् आङ्ग्लांश्च प्रचण्डं पर्यवास्थिषत। कृषकाणां सङ्घस्य शक्तिं पर्यवस्थातुमक्षमा आङ्ग्लास्ततः पलायिषत। एवं शनैः शनैराङ्ग्लानां शिल्पशाला रुद्धगतयोऽजनिषत। शक्तिप्रयोगेण बङ्गालस्य कृषका आङ्ग्लानभ्यबीभवन्।

**टिप्पणी :** अवकेशिनी - बञ्जर, पर्यवास्थिषत - मुक़ाबला किया (परि अव ✓ स्था, लुङ्, प्र.पु.ब.व, 'समवप्रविभ्यः स्थः' पा.सू. १.३.२२ इत्यात्मनेपदम्).

१८७० संवत्सरादारभ्य पञ्चदशवर्षाणि यावद् बङ्गालराज्ये कृषकाणां तदान्दोलनं निरन्तरमस्थात्। शासका नियमविरुद्धं कृषिकरमववर्धन्, नैकेषां कृषकाणां भूमिं सप्रसभमध्यग्रहीषुस्तेषां कृषिफलं वा बलादपाहार्षुः, मिथ्याभिशंसनैस्तान् वन्दिनो व्यधुरित्येतादृशैर्विविधैरत्याचारैराङ्ग्ला विमलात्मनः कृषकानपिपीडन्। निरन्तरं पीडितानां कृषकाणां संघी-भूय प्रचण्डं पर्यवस्थानमाङ्ग्लान् भूस्वामिनो नितरामतित्रसत्। संघीभूतानां कृषकाणां प्रचण्डं तत् पर्यवस्थानं बङ्गालराज्यस्य सीम्नोऽतिक्रम्य क्रान्तिरूपेण भारतस्य भूयिष्ठे भागे प्रासार्षीत्।

भारते प्रकाशमानानि राष्ट्रवादीनि दैनिकसमाचारपत्राण्यपि स्वतन्त्रतायै व्याकुलानां भारतस्य प्रजानां निरन्तरं वर्धमाने तस्मिन्नान्दोलने महार्थां भूमिकामन्वतिष्ठिपन्। हिन्दूपैट्रिऑटित्यभिधेयं समाचारपत्रं गतिहीनानां कृषकाणां

वैषम्याण्यधिकृत्य तेषां नेतृत्वमकार्षीत्। तत् समाचारपत्रं कृषकेषु राष्ट्रियताया भावमुत्पाद्य तान् प्राबूबुधत्। गुर्वर्था ववृतेऽमृतबाजार-पत्रिकेत्यभिधेयस्य समाचारपत्रस्य भूमिका। अस्य सम्पादकः शिशिर-कुमारघोषमहाभागो निर्भयं स्वतन्त्रताया विचारधारां समार्तथत। आङ्ग्ल-शासकानां व्यवहारो राष्ट्रवादीनि समाचारपत्राणि प्रति नितरामत्याचारपूर्णोऽवर्तिष्ट। सर्वाणि वैपरीत्यानि पर्यवतिष्ठमानास्तेषां देशभक्ताः सम्पादकाः क्रान्तिज्वालां प्रज्वलितामतिष्ठिपन्।

१८८१तमे संवत्सरे फरवरीमासस्य द्वितीयायां तिथौ दयालसिंह-मजीठियामहाभागः ट्रिब्यूनेत्यभिधेयं समाचारपत्रं प्राचकाशद् यत्साम्प्रतं चण्डीगढनगरात् प्रकाशितं भवति। बालगङ्गाधरतिलकमहाभागः केसरी-त्यभिधेयं दैनिकसमाचारपत्रं मराठापत्रिकाञ्च प्रकाशयित्वा क्रान्तिस्वरमुग्रतरं व्यधात्। आङ्ग्लशासनं समाचारपत्राणां सम्पादकान् वाग्रहितान् विधातुं नैकविधानत्याचारपूर्णान् कपटोपायानुपायूयुजत, नैका एक्टेत्यभिधेया व्यवस्थाश्च निरमीमपत्। आङ्ग्लशासनस्यैषा दमननीतिर्देशवासिनोऽतितरामचुक्षुभत् तेषामाक्रोशश्च भूयोऽप्युग्रतरं व्यधात्। रोषस्य प्रदर्शनार्थं कलकत्तामहानगरस्य टाउनहालेत्यभिधेये स्थाने पञ्चसहस्रं क्रुद्धानां जनानां समवाय आङ्ग्लशासकानां निद्रां विप्रकृष्टां व्यधात्।

१८७६तम ईसवीयसंवत्सरे सुरेन्द्रनाथबैनर्जी-महाभाग 'इण्डियन-एसोसिएशन' इत्यभिधेयस्य दलस्य स्थापनाञ्चकार। नागरिकेभ्यस्तेषामधिकारान् दापयितुं सम्पूर्णभारतवर्षस्य प्रजानां संघीकरणमवर्तिष्टास्याः संस्थाया लक्ष्यम्। सुरेन्द्रनाथबैनर्जीमहाभागः सम्पूर्णे भारतवर्षे राज्याद् राज्यं गत्वा संघर्षाय देशस्य प्रजाः सन्नद्धा अचीक्लृपत्। स देशस्य यूनः शिक्षासमाप्तेरनन्तरं देशसेवाया आत्मनो जीवनानि समर्पयितुं प्रैरिरत्।

एक आङ्ग्लन्यायाधीशो हिन्दूदेवतां तस्य न्यायालयमागत्योपस्थातुं निरदिक्षत्। बैनर्जीमहाभाग एतादृक्षमनुपयुक्तमादेशं हास्यास्पदं घोषयित्वोच्चान्यायालयस्य न्यायाधीशमाक्षैप्सीत्। परिणामस्वरूपं न्यायाधीशस्यादेशेन स मासद्वयस्य कालावधिं कारागारे व्यत्ययीयपत्। एतादृशस्याद्वितीयस्य वीरस्य कारागारदण्डस्य समाचारोऽकालक्षेपेणैव सर्वत्र प्रासार्षीत्। प्रसृतमात्रेऽस्मिन् वृत्ते क्रोधेन हतबुद्धयो भारतस्य प्रजाजना राजकीयभवनान्यदध्वंसन् नगररक्षिजनेषु च पाषाणखण्डानववर्षन्। एतावद्-विशालोऽवर्तिष्ट जनसम्मर्दो यदतिकठिनमजनि नगररक्षिभ्यो बैनर्जीमहाभागं न्यायालयात् कारागारायापनयनम्।

- पटियाला, 9781124775

क्रमशः

# पराम्बाकृपाकाङ्क्षा

❑ डॉ. रामनारायणझा:

१५७

उन्नत्यै खलु जीवनस्य सततं कुर्यात्सदा संगमं
विश्वस्तैश्च महद्भिरेव विमलैर्विज्ञानविज्ञैरहो।
शास्त्रैस्स्वच्छतमैरथात्मसुखितैः कातर्यभावान्वितै
र्गोभिर्ब्रह्मविदां वरैरनुपलं सत्संगिभिस्सर्वथा।।

१५८

संगे नैव हि नैव चोन्नतिपरैर्लज्जाऽन्यथाचिन्तनं
निम्नोच्चं मतिमद्भिरेव सकलैः कार्य्या जनैः श्रेयसे
कर्त्तव्यं ननु तेन मंगलभृतां मांगल्यमाशूत्तम-
मायायान्नवगर्भितं स्थिरतरं यज्जीवतां चामृतम्।।

१५९

संगेनाशु मलं मतिस्थविपुलं नश्येन्महद्-विस्तृतं
स्वान्तस्थं किल लोकमंगलहतं सद्योऽसुरैर्मण्डितम्।
श्रेयस्सूतसुमञ्जुलं नु सकलं मद्यादिकं शान्तिकं
सम्पद्येत पदे पदे प्रियतरं चारूत्तरं जीवनम्।।

१६०

संगः किन्न करोति जीवनमहे पुंसां हि लम्बायिते,
दद्यान्मोदमहोत्सवं प्रतिपदं पन्थानमाशूत्तमम्।
संसारस्य सुवैभवं नवनवं चोत्साहपूर्णं मनो
वैषाद्यं ह्यपवारयन् हि विपदां कीर्तिञ्च विस्तारयन्।।

१६१

चारित्र्यं परिशोधयेत् प्रतिगतं चान्यैः कृतं स्मारयेत्,
कर्त्तव्यं परिमार्जयेदनुदिनं शीलं सदा सारयेत्।
दानायाथ सुनोदयेद् रविरिव प्रीतिं गुणान् कत्थयेत्
संगस्सर्वसुखावहोऽथ महतां प्रज्ञावतां नागर!।।

१६२

चाञ्चल्यं दवयन् कृतज्ञमहिमानं वै मृदु स्फोरयन्
दुस्साधं परिराधयन्कृतधियां गुह्यं नु सन्दर्शयन्।
मायाजातमदादिदोषनिकरं तुंकारणं कर्तयन्
संगस्सारमयो महान्नरगतो द्वन्द्वापहः पार्थिव!।।

१६३

गर्वादर्शनिकेतनांकुरमलाहंकारसंकेतनां
नूनं द्रागपसारयन्नहरहस्संगो हि चिन्तामणिः।
वित्तामोद शुभाऽभयामलविभासंस्कारसंदर्शनां
दत्ते कर्मविदां प्रमोदनदृशां लोकाय सत्यात्मनाम्।।

१६४

चित्तस्थं बहुसंशयं भ्रमचरं विश्रामलोपं तमो
गाढं गूढतमं विनाशनपरं जीवात्मनां कल्मषम्।
प्रोच्चानन्तविदूषणं बहुतिथं विध्वंसयञ्चामृता-
त्मा संगः खलु कल्पवृक्ष इव भो! किं किं न दद्यादयम्।।

१६५

कुर्य्यात्संगमनं क्षणेऽपि यदि चेच्चैतन्यचिन्तामणि-
ना युक्तो भवसागराद् झटिति भो! तीर्त्वाऽमृतञ्चाप्नुयात्
पूर्णानन्दमहोत्सवार्णवगृहे नृत्येन्नरोऽनश्वरो
भूत्वा वै विलसन् विधूय विपुलं नानात्वमेकामृते।।

१६६

वैरूप्यं परिनश्यति प्रतिपदं संगेन नूनं नृणां
वैदूष्यं व्यपगच्छति प्रतिनरान्नूनं सतां सौरभम्।
शान्त्या दीर्घतमं सनातनमयं सिद्धिप्रदं सांख्यकं
प्रेम्णोपैतितरां महामहिमवन्नित्यं जनो जंगमः।।

१६७

उच्चत्वं प्रतिपद्यतेऽनरवरो नूनं नवीनं नभोऽ
दिव्यांगश्श्पृशतीति सात्त्विकचरस्सत्त्वस्य दिव्यौपमम्।
संगेनाशुतमं समस्तविमलं चेतश्चिनोत्यैहिकं-
साधूनां विमलात्मनां धृतधियां सत्यार्थसंवादिनाम्।।

१६८

संगस्सूच्चघनं शशांकविमलं प्रह्लादकं निर्मलं
नातश्चान्यतमं ह्यनूपसुखितं तस्मादयं चेतसि।
भूयाद् दिव्य-विभातपूर्णकमलः फुल्लोऽलधीयान्नवो
येनाधाशु भवार्णवेपि विमलो भूत्वा रमेताखिलः।।

# अवर्णप्लुतोच्चारणविमर्शः

❑ श्रीवत्सजैमनः

अथ अध्यवर्णकुलं पतितानां वर्णानाम् उच्चारणं विचार्यते। तत्रापि प्रमुखानां ह्रस्वदीर्घप्लुतानाम्। विचारणीयमिह यदस्माभिः यदुच्चारणं क्रियते यच्च लोकेऽपि सुप्रसिद्धं तत् साधु न वेति। यतोहि सृष्टौ यदुच्चारणं प्रवर्तितं भवति तत् कालक्रमेण दुष्यते। तत्र तावत् अकारोच्चारणं कथमिति ज्ञीप्सायां यथा लोके प्रसिद्धं तथैव। आकारोच्चारणं कथमिति मिमनिष्यते चेत् यथा लोके क्रियते तथैव। परन्त्विदानीं प्लुतस्याकारस्य उच्चारणे कश्चिद् क्लेशो भाति। तच्च कथञ्चेदत्र उदाहरणार्थं स्मर्यते एका काचित् भाष्योक्तिः –

**अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः।**
**कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्।।**
(महाभाष्यम्, पस्पशाह्निकम्)

प्रत्यभिवादे प्रत्यभिवादकेन अभिवादनकर्तुः नाम्नः प्लुतिः यथायथं कर्तव्येति तदाशयः। अत्रेदानीं कस्यचित् नाम विश्वपा इति स्याच्चेत् प्रत्यभिवादन-कर्ता '**आयुष्मान् भव विश्वपा३:**' इति वक्ति, एवमत्र आकारस्य दीर्घकालिकध्वनिः श्रूयते। इह तावत् कस्यचित् नाम 'देवदत्त' इति भवेच्चेत् प्रत्यभिवादन-कर्ता '**आयुष्मान् भव देवदत्त३**' इति भणति तथात्र अकारस्य दीर्घकालिकध्वनिः श्रूयते। अनेन ज्ञायते यद् अकाराऽऽकारयोः प्लुत्योः श्रुत्योः अस्ति कश्चित् भेदः। यदि हि एवं स्यात्तर्हि अकारः चतुर्विंशतिभेदघटितः, न तु इदानीं तस्य दीक्षितोक्ता अष्टादशभेदाः विज्ञातुं शक्याः। अत्र च किं मानमिति चेत्–प्रतीतिरेवेति। न च शक्यः प्रतीतेरपलापः कर्तुम्। सिद्ध्यत्येवं चतुर्विंशतिभेदघटितत्वम-कारस्य। अथ चोक्तं दीधितिकृतापि– '**न हि कस्यचिद् ग्रन्थकृतो विपरीतलेखनं युक्तिबलाद् वस्तुसिद्धौ बाधकम्**' इति।

एवं हि स्वीकारे शब्दशास्त्रेण सह भूयान् विरोधः प्राप्नोति। सः च न कदाचिद् भवितुमर्हति। एवम्विधः दोषः अधिशास्त्रं न प्रसरेत् एतदर्थं यत्नः कर्तव्यः। यत्नो नाम एवं प्रत्यापत्तिवचनं कर्तव्यं यत् अकारस्यापि प्लुतः आकारप्लुतवत्स्यात् येन अकाराऽऽकारयोः प्लुत्योः भेदो न श्रूयेत तेन च अकारस्य अष्टदशभेदाः एव भवन्ति। तत्तर्हि एतत्प्रत्यापत्तिवचनं कर्तव्यम्। न कर्तव्यम्। यद्भाष्ये वचनमुक्तं तदत्र प्रमाणमेव भविष्यति –

**'नैव लोके न च वेदे दीर्घप्लुतौ संवृतौ स्तः।**
**कौ तर्हि? विवृतौ, यौ स्तस्तौ भविष्यतः' इति।**
(महाभाष्यं, प्रत्याहाराह्निकम्)

अयम् आशयो यत् ह्रस्वस्याकारस्य प्रयत्नः संवृतो वर्तते, यदि अकारस्य प्लुतिम् अकारस्यैव दीर्घकालिकश्रुतिरूपेण 'अ३' इत्येवं कुर्मश्चेत् अकारस्य प्लुतस्य संवृतत्वापत्तिं शास्ति। तत्तर्हि कथम् उच्चारयितव्यम् इति चेत्, अत्रोच्यते– आकारस्य प्लुतस्योच्चारणं कुर्मः, आकारस्य दीर्घकालिकश्रुतिरूपेण ('**आ३**' इति), तथैव ह्रस्वस्याकारस्यापि प्लुतस्योच्चारणं कर्तव्यं तदेव साधु। अतः तस्यापि ह्रस्वस्याकारस्य प्लुतस्य विवृतत्वं भविष्यति नान्यथा। अतः ये केऽपि जनाः अकारस्य प्लुतिं अकारस्यैव दीर्घकालिकश्रुतिरूपेण ('अ३' इत्येवम्) विदधति तत् सर्वथैवासमीचीनं भाष्यविरोधाच्चोपेक्ष्यम्।

इति यथास्वमति अवर्णप्लुतोच्चारणं सदोषवारणं निरूपितम्।।

– शास्त्रितृतीयवर्षीयच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः

# सम्पातिचरितम्

❑ युगलकिशोरभारद्वाजः

अध्यात्मरामायणे सम्पातिचरितं वानराणां सीतान्वेषणे चिन्तयन्तो भ्रमतां प्रायोपवेशनसमये सम्मुखोपस्थितं महाकायमेकं गृध्रं दृष्ट्वा इत्थं प्रकाशितम् यद् मासादूर्ध्वमपि जनकात्जा न दृष्टा, तदा मरणे कृतमतिकाः वानराः महेन्द्राद्रिगुहान्तरात् निर्गत्य पर्वताकारं समीपे आगतं गृध्रं पश्यन्ति। तत्समये भीतमानसा वानराः गृध्रवचनं श्रुत्वा यद् सहजप्राप्तानैतान् वानरान् एकैकशः दिने दिने भक्षयामि सर्वान् इति, अस्माभिः सुग्रीवस्यापि हितं न कृतम्, न रामकार्यं हि कृतम्। वृथानेन वधं प्राप्ता वयं यमासादनं गच्छामः। अहो जटायुः धर्मात्मा यः रामकार्यार्थे मृतः श्रेष्ठमोक्षमवाप्तवान्।

वानरभाषितं वाक्यं श्रुत्वा सम्पातिरवदत् के यूयं कर्णपीयूषसन्निभस्य मम भ्रातुश्चर्चां कुर्वन्ति। हे! प्लवगसत्तमाः माभून्मत्तः भयं। कृपया विस्तरेण उच्यताम्। ततः गृध्रसन्निधौ अङ्गद उवाच, हे श्रीमन्! दुरात्मना रावणेन रामभार्या साध्वी सीता हृता बलात्। तदा रामरामेति क्रोशन्तीं सीतां श्रुत्वा प्रतापवान् जटायुर्नाम पक्षीन्द्रो तेन सह युद्धं कृत्वा हतो वीरः। तेन राघवार्थं कृतं कार्यं प्रसंशनीयमस्ति। रामेण दग्धः स सायुज्यमगमत्क्षणात्। तदा रामः सुग्रीवेण सख्यं कृत्वा सीतायाः परिमार्गणे सुग्रीवेण प्रेषिताः वयं वनेऽस्मिन् समायाताः। हे पक्षिराज यदि सीता विषयकं किञ्चिदपि जानासि, तर्हि कथय नः शुभां वार्तां। ततः हृष्टमानसः सम्पातिः अंगदस्येदं वचः श्रुत्वा उवाच यत् प्रियो मे भ्राता जटायुः, भवद्भिः बहुवर्षसहस्रान्ते भ्रातृवार्ता श्रुता मया। हे प्लवगेश्वराः भवतां सीताविषये वाक्यसाहाय्यं करिष्येऽहम्। प्रथमं भ्रातुः सलिलदानाय मां जलान्तिकं नयध्व। पश्चात् भवतां कार्यसिद्धये शुभं वक्ष्येऽहम्। ततः सलिले भ्रातुर्जलाञ्जलिं दत्वा पुनः स्वस्थानमास्थाय सम्पातिः हरीश्वरः कथयामास। सम्मुखे त्रिकूटगिरिमूर्धनि लङ्कानाम नगर्यास्ते। तत्राशोकवने सीता राक्षसीभिः सुरक्षिता मे दृश्यते। गृध्रत्वाद् दूरदृष्टिर्मे, नात्र संशयितुं भवतां। समुद्रमध्ये सा लङ्का शतयोजनदूरे स्थिता। स्वस्वक्षमतानुसारं यः समुद्रं लङ्घयेत् स एव जानकीं दृष्ट्वा पुनरायास्यति। एकाकी अहमेव भ्रातृहन्तारं दुरात्मानं रावणं हन्तुमुत्सहे किन्तु पक्षविवर्जितोऽहं न समर्थः। यूयं यतध्वमतियत्नेन सरितांपतिं लङ्घितुं। तदा रघुश्रेष्ठो रामः राक्षसाधिपं रावणं हत्वा विदेहकन्यां प्राप्स्यति इति ममाशिषः।

ततः ते कौतुकाविष्टाः सर्ववानराः प्रपृच्छुः। हे सम्पाति त्वमादितः सर्ववृत्तान्तं कथय। तेनोक्तं पुराऽहं जटायुश्च रूढयौवनौ भ्रातरौ खगौ दर्पितावावां सूर्यमण्डलपर्यन्तं बलजिज्ञासया बहुयोजनसाहस्रं गतौ सूर्यरश्मिभिर्दग्धपक्षौ विन्ध्यमूर्धनि पतितोऽहं पतनान्मूर्च्छितो दिनत्रयात् पुनः प्राणसहितोऽभवम्।

भ्रान्तमानसोऽहं शनैरुन्मील्य नयने दृष्टवान् तत्राश्रमं शुभं। तत्र चन्द्रमा नाम मुनिराजो मां दृष्ट्वा विस्मितोऽवदत्, सम्पाते किमिदं केन वा कृतं तेऽद्य स्वरूपं, जानाम्यहं पूर्वत: त्वं तु बलवानसि, दग्धौ किमर्थं ते पक्षौ। तत: स्वचेष्टितं सर्वं कथयित्वाति-दु:खितं मुनिशार्दूलमब्रवम्। हे मुने विपक्ष: कथं जीवितं धारयितुं शक्तोऽहम्। तत: दयार्द्रविलोचनो मुनिर्वीक्ष्य मे अवदत्। वत्स शृणु मे वच:, श्रुत्वा यथेप्सितं कुरु। मुनिरुवाच -

**देहमूलमिदं दु:खं देह: कर्मसमुद्भव:।**
**कर्म प्रवर्तते देहेऽहं बुद्ध्या पुरुषस्य हि।।**
**अहङ्कारत्वनादि: स्यादविद्यासंभवो जड:।**
**देहोऽहमिति बुद्धि: स्यादात्मनोहङ्कृतेर्बलात्।।**
**तन्मूल एव संसार: सुखदु:खादिसाधक:।**
**आत्मनो निर्विकारस्य मिथ्या तादात्म्यत: सदा।।**
**देहोऽहं कर्मकर्ताहमिति संकल्प्य सर्वदा।**
**जीव: करोति कर्माणि तत्फलैर्बद्ध्यतेऽवश:।।**

(किष्कि.सर्ग: ८१)

पुनरुक्तम्-

**तस्माद् देहद्वयादन्यमात्मानं प्रकृते: परम्।**
**ज्ञात्वा देहादिममतां त्यक्त्वात्मज्ञानवान् भवेत्।।**
**शुद्धं बुद्धं सदा शान्तमात्मानमवधारयेत्।**
**चिदात्मनि परिज्ञाते नष्टे मोहेऽज्ञसम्भवे।।**
**तस्माद् देहेन सहितो यावत्प्रारब्धसङ्क्षय:।**
**तावत्तिष्ठ सुखेन त्वं धृतकञ्चुकसर्पवत्।।**

हे पक्षिन्! शृणु - त्रेतायुगे नारायणोऽव्यय: दाशरथिर्भूत्वा रावणस्य वधार्थाय दण्डकानाग-मिष्यति। तदा सुग्रीवनिर्देशाद्वानरा: सीताया: परिमार्गणे आगमिष्यन्ति। जलधेस्तीरं तदा त्वया तत्कारणवशाद् तै: समागम: भविष्यति। नास्त्यत्र कोऽपि संदेह:। तदा सीतास्थितिं तेभ्य: कथनात् तव पक्षौ पुनर्नवौ द्वावुत्पत्स्येते। मां एतद् चन्द्रनामा मुनिकुलेश्वर: बोधयामास। पश्यतु मे पक्षौ नूतनावतिकोमलौ जातौ।

**स्वस्ति वोऽस्तु सीतां द्रक्ष्यथ निश्चयं।**
**यत्नं कुरुध्वं दुर्लंघ्यसमुद्रस्य विलङ्घने।**

मुनेराशीर्वचनम् -

**यन्नामस्मृतिमात्रतोऽपरिमितं संसारवारांनिधिं**
**तीर्त्वा गच्छति दुर्जनोऽपि परमं विष्णो: पदं शाश्वतम्।**
**तस्यैव स्थितिकारिणस्त्रिजगतां, रामस्य भक्ता: प्रिया**
**यूयं किं न समुद्रमात्रतरणे शक्ता: कथं वानरा:।।**

(अध्यात्मरामा / किष्किं / ८/५४-५५)

- पूर्व-अतिरिक्तनिदेशक: आयुषविभागत:,
राजस्थानप्रान्ते

# भाषा-विज्ञान-विचारयोः परस्पराऽन्योन्याश्रयत्वम्

❑ डॉ. रणजीतकुमारझाः

एकेन विज्ञातेन सर्वं विज्ञातं भवति सत्यमिदं वचनम्। साम्प्रतं विज्ञानयुगे व्यवहारजातं विज्ञानमूलकं किमपि तथ्यं गम्यमानं भवेत्। अनुपदं विना विज्ञानं गमनमनुचितं प्रतिभाति विदुषाम्। भाषाविज्ञानमपि विज्ञानस्यांशभूतं वरीवर्ति। भाषाविज्ञानस्य विचारेण भाषायां निदानं सुतरां ज्ञायते। एवं नहि भाषाविज्ञानेन विना भाषाणां मूलभूतं रहस्यं ज्ञातुं शक्यते। केवलं भाषार्थज्ञानं ज्ञानमेव भवति न विज्ञानमिति। नहि विज्ञानेन भाषाज्ञानं सम्प्रवर्तते इत्यत्र परस्पराऽन्योन्याश्रयत्वम् इति विज्ञानविद्भिः मन्यते। ततः साम्प्रतं भाषायां च का प्रकृतिः, कः प्रत्ययः? विज्ञानमिति किमत्र? विचार्यते।

तत्र व्याकरणस्य दार्शनिकं रूपं स्फुटमभिव्यक्तम्। स चासौ सम्प्रति भाषाविज्ञान-पदार्थस्य मूलस्वरूपमिति। भाषायाः विज्ञानम् भाषाविज्ञानम्। विशिष्टं किमपि ज्ञानमिति विज्ञानम्। पदानाम् अर्थः पदार्थः। भाषणाद् भाषा इति। भाष् इत्यस्माद् धातोः अचि टापि च कृते भाषाशब्दस्य निष्पत्तिर्भवति। विज्ञायतेऽनेन इति विज्ञानं खलु ज्ञा अवबोधने धातोः ल्युडन्तरूपम्। यास्केन पाणिनिना चापि लोकव्यवहृतभाषार्थे भाषाशब्द एव व्यवहृतः -

**यथा-भाषायामन्वध्यायञ्च[1] इति,**

**भाषायां सदवसश्रुवः[2] इति,**

**प्रथमायाश्च द्विवचने भाषायाम्[3] इति च।**

मन्ये, यदा प्राकृतभाषायाः प्रचारो बहुलीभूतस्तदा ततो भेदं बोधयितुं लोके व्यवहृतपूर्वा तदानीं क्षीयमाणप्रचारा चेयं भाषा विद्वद्भिः संस्कृतपदेन व्यवहृता जाता। पश्चाद् भाषाया रूपद्वयं, लौकिकं वैदिकञ्च। महाभारतकालात् पूर्वतनभाषा वैदिकभाषा, ततश्च लौकिकभाषा इतीरिता।

अतः संस्कृतभाषापदार्थमाश्रित्य एतद् विवेचनं सुलक्षणं सुललितञ्चेति। यत्र कुत्रापि भाषापदार्थस्य अन्वेषणं भवति तत्र भाष्यते व्यवहारादिषु प्रयुज्यते इति भाषा, भाष 'व्यक्तायां वाचि' इति धातोः निष्पन्नोऽयं शब्दः। मानवः स्वमनसि विद्यमाना आलोचनाः भावना अनुभूतिञ्च अर्थयुक्तैर्ध्वनिभिः सङ्केतैः, अर्थयुक्तैः लिखितसङ्केतैश्च व्यक्तीकरोति।

भाषा नाम अभिप्रायप्रकटनसाधनम्। वस्तुतः लोके द्वयोर्मनुष्ययोर्मध्ये परस्परम् भावग्रहणाय भावविनिमयाय च भाषां विना न अन्यत् साधनमस्ति। ध्वन्यात्मकशब्दैः विचाराणां प्रकटीकरणमेव भाषा। भाषयैव मानवः मानव इति परिगण्यते। भवन्तु बह्व्यः भाषाः, ताः अतिप्राचीनाः सन्तु, किन्तु भाषाविज्ञानपदमाकर्ण्य इदमुच्यते यत् परम्परात एव

इयं भाषा वैज्ञानिकी बभूव। संस्कृतभाषा अतिप्राचीना सुसमृद्धा चेति।

भाषाविज्ञानपदार्थेषु शब्दानामुत्पादितः रूपविकासः, वाक्यानां संरचनाप्रभृतीनां विषयाणां विवेचनं क्रियते। अनेन प्रकारेण भाषाविज्ञानस्य माध्यमेन कस्याश्चन भाषायाः वैज्ञानिकमध्ययनं क्रियते इति निश्चीयते।

संस्कृतवैदिकवाङ्मये बहूनि रूपाणि प्राप्यन्ते, येषां प्रयोगः सम्प्रति लौकिकसंस्कृते भाषायां वा नैव दृश्यते। एतस्याम् अवस्थायां लौकिक-अलौकिकयोः संस्कृतयोः अध्ययनं करोति भाषाविज्ञानम्। भाषावैज्ञानिकानां प्रयोगेणैव सुनिश्चितं जातं यत् संस्कृत-पालि-प्राकृतानां भाषाणां मूलम् एकमेव आस्ते। संस्कृतसाहित्यस्य वैज्ञानिकम् अध्ययनं करोति भाषाविज्ञानम्। भाषाविज्ञानस्य सम्बंधः सर्वेषां मानवानां भाषाभिः सममस्ति। इत्थं भाषाविज्ञानपदार्थे वर्णः स्वरः मात्रा बलं सामसन्तानादयः विचार्यन्ते। तत्र ध्वनेः वर्णपदवाक्यविज्ञानेषु सम्बंधः, ध्वनिरुच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वादि-अङ्गानां, प्रकृति-प्रत्ययानां, संज्ञा-सर्वनाम-क्रिया-विशेषणादीनां, नामाख्यातोपसर्ग-निपातानां, पदपदार्थ-विषयकानां विकारादीनां, विकारमूलक-कारकाणाम् अन्येषां विविधविध-विषयाणाञ्च अध्ययनं क्रियते।

अथ भाषाविज्ञानयोर्मध्ये परस्परामन्योन्याश्रयत्वविषये कथञ्चित् मतमुपस्थाप्य तस्य नैसर्गिकः सम्बन्ध अपि विचार्यते। प्रथमं तावत् भाषाविज्ञानयोः सम्बन्धविषये चर्चां प्रस्तौमि। भाषा मानवजीवनस्यानिवार्यमुपकरणमस्ति। भाषां विना मानव-जीवनस्य परिकल्पना नैव खलु। सापेक्षभूता भाषा मानवस्य तादात्म्यमङ्गं भजते। भाषते इति भाषा। भाष् इत्यस्माद् धातोः भाषा तु भाष्यते शास्त्रव्यवहारादिना प्रयुज्यते इति। सा च भाषा वाचः प्रकृतिमूला वर्तते। प्रकृतिमूला इयं वाक् विदुषां मध्ये स्फोटात्मकरूपा वर्तते। तत्राखण्डपदवाक्यस्फोटादिरूपेण अष्टौ स्फोटा मञ्जूषायां वर्णिताः। अयमेव स्फोटः वाक्रूपो भवति। तस्य ज्ञानं विज्ञानरूपात्मकम्।

अग्रे परापश्यन्त्यादिरूपात्मका वाग् जीवात्मनि कथं तिष्ठतीति परस्परान्वयित्वं सम्बन्धयति। यतोहि परापश्यन्त्यादि-वाचां स्वीकारे वाच उत्पत्तिविज्ञानमिति प्रयत्यते। वस्तुतः भाषा एका व्यवस्था वर्तते यत्र स्वाभाविकं विज्ञानं तिष्ठति। तस्य विज्ञानस्य नाम वाग्विज्ञानम्। तत् च वाग्विज्ञानं शास्त्राधारमूलम् सम्पूर्णविज्ञानात्मकम्। कथं विज्ञानं शास्त्रे तिष्ठति। अत्र ऋषेः वचनम्-वाग् वै विज्ञानम्। तदाश्रया वाग् अमूर्तरूपा। अमूर्तत्वं यद्यपि संदिहानं भवति, किन्तु शब्दप्रमाणे आगमशास्त्रे ध्वनिविचारे सैषा वाक् स्पर्शोष्मभिर्व्यज्यमाना वह्नी नानारूपा भवति इति श्रुतिरपि व्याख्याता।

वस्तुतः भाषाविज्ञानमेकं शास्त्रम्। अस्मिन्

भाषाया: विभिन्नेष्वङ्गेषु विवेचनं भवति। तत्रोत्पत्तिः, विकासः, परिवर्तनञ्चेति तस्याः तुलनात्मकमध्ययनञ्च भवति। सामान्येन तस्मिन् मानवीयभाषायाः तदाश्रयभूतोपभाषाया अध्ययनं भवति। अत्र पदवाक्यप्रमाणान्तर्गते भाषायाः ऐतिहासिकतथ्यं तुलनात्मकदृष्ट्या विभिन्नासु भाषासु मध्ये भवति। तत्र चेत् किमपि वैशिष्ट्यं तस्य सम्यग् व्याख्यानं, सिद्धान्तानां प्रतिपादनं निर्धारणञ्चेति भाषाविज्ञानं कथ्यते। यद्यपि व्यापकं क्षेत्रं भाषाविज्ञानस्य, तथापि सूत्रात्मकेन भाव्यमिति तस्य वैज्ञानिकत्वम्। अत्र पुनः विचारपथे परस्पराऽन्योन्याश्रयत्वम् इति विचार्यते।

या भाषा विज्ञानाधारिता वर्तते। तच्च विज्ञानं भाषाधारभूतं विद्यते। भाषायां वर्णपदवाक्यानां समाहारो भवति। तानि वर्णानि पदानि च परावाङ्मूलचक्र-स्थानानि भवन्ति। सा सूक्ष्मवाग् नादे हृदये चाव्यहितत्वेन तिष्ठति।

मूर्धाभिषिक्तं तावत् परा शक्तिरेव वाचमङ्गीकरोति। शाब्दिकानां तदेव शिरोधार्यं भवति। हृदिस्था मध्यमा वाक् पुनः कण्ठदेशेन वैखरीत्वेन व्यनक्ति। वस्तुतः बिन्दुरूपमव्यक्तं त्रिगुणं जायते। इदमेव शक्तितत्वम्। तस्य बिन्दोरचिदंशो बीजम्। चिदचिन्मिश्रोंशो नादः। चिदंशो बिन्दुरिति। अचिच्छब्देन शब्दार्थोभयसंस्काररूपाऽविद्योच्यते। अस्माद् बिन्दोः शब्दब्रह्मापरनामधेयम्, वर्णादि-विशेषरहितम्, ज्ञानप्रधानम्, सृष्ट्युपयोग्यवस्था-विशेषरूपम्, चेतनमिश्रम्, नादमात्रमुत्पद्यते। एतद् जगदुपादानमेव 'रवः परा च' आदिशब्दैर्व्यवह्रियते। उक्तञ्च-

**बिन्दोस्तस्माद् भिद्यमानाद्रवोऽव्यक्तात्मकोऽभवत्।**
**स एव श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते।**[8]

एतत् सर्वगतमपि प्राणिनां मूलाधारे संस्कृतपवनचलनेनाभिव्यज्यते। ज्ञातमर्थं विवक्षोः पुंस इच्छया जातेन प्रयत्नेन योग एव मूलाधारस्थपवनसंस्कारः, तदभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निष्पन्दम् परा वाग् इत्युत्यते। तदुक्तं हरिणा-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**[9]

शक्त्याश्रयनिरूपणप्रसङ्गे लघुमञ्जूषायां वर्णितं वर्तते। ततः युगपदेव मध्यमावैखरीभ्यां नाद उत्पद्यते। तत्र मध्यमानादोऽर्थवाचकस्फोटात्मक-शब्दव्यञ्जकः। वैखरीनादो ध्वनिः सकलजनश्रोत्रमात्रग्राह्यो भेर्यादिनादवन्निरर्थकः। मध्यमानादश्च सूक्ष्मतरः कर्णपिधाने जपादौ च सूक्ष्मतरवायुव्यङ्ग्यः शब्दब्रह्मस्फोटव्यञ्जकश्चेति। तादृशमध्यमानाद-व्यङ्ग्यः शब्दः स्फोटात्मको ब्रह्मरूपो नित्यश्च। तदाह शाब्दिकानां वाच्य-लक्ष्य-व्यङ्ग्यार्थप्रतिपादकानां वाचकलाक्षणिकव्यञ्जकानां शब्दानां तन्निष्ठजातेर्वा स्फोटव्यवहारः। स्फोटो हि-स्फुटति अर्थो यस्मादिति व्युत्पत्त्या पङ्कजादिवद् योगरूढः। केवलयोगस्वीकारे

वाच्यलक्ष्य-व्यङ्ग्यानां चेष्टायाश्च व्यङ्ग्यार्थ-प्रतिपादकत्वेनातिव्याप्तिदोषस्य तत्र सम्भवात्। तथा चार्थनिष्ठ-विषयताप्रयोजकशक्तिमत्त्वमेव स्फोटत्वमिति लक्षणं पर्यवस्यति। वस्तुतः स्फोटाख्यध्वनिरिति तत्र व्यञ्जयति।

तत्र स्फोटेषु वर्णरूपमध्यमानादव्यङ्ग्यो वर्णस्फोटः। पदरूपमध्यमानादव्यङ्ग्यो द्वितीयः पदस्फोटः। वाक्यरूपमध्यमानादव्यङ्ग्यो वाक्यस्फोट इति। एभिः वर्णपदवाक्यैः सा ध्वनिरिति वैखरीत्वेन चरमवाक् श्रूयते। सा च वाग्भाषा तदाश्रयभूता परावाग्जन्या भवति। बह्वीः भाषाः यत्र नैसर्गिकी ध्वनिरिति पदानामर्थः चकास्ति। येषां शब्दानामपि अर्थो लभ्यते व्युत्पत्या यया, तेषां शब्दानां प्रकृति-प्रत्ययानां कर्त्तृकर्मादिप्रत्ययानाञ्चेद् अर्थो लभ्येत तर्हि तत्रापि योऽर्थः स शब्दः, स एव शब्दः योऽर्थः इति मञ्जूषायामपि प्रतिपादितः।

भाषाविज्ञानपदार्थमवलम्ब्य मूलतः प्रकृति-प्रत्यययोः पूर्वं धातुः आव्रजति। धातुश्च समेषां शब्दानामाधारः। पाणिनिना अपि धातोः प्रथमोपादानत्वेनाभ्युक्तमिति। स च व्याकरणाधारः। प्रकृति**प्रत्यययोराधारः**। येन धातुना प्रकृतिप्रत्ययौ संयुज्येते। फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः। अत्र यत्नातिरिक्तः फलानुकूलो व्यापारो धात्वर्थः। यत्न आख्यातार्थः। निरुक्तकारो लिखति भावप्रधान-माख्यातम्। भावः क्रिया प्रधानं यस्मिन् तत् भावप्रधानम् आख्यातम्। भावोऽत्र क्रिया, सा च करणव्युत्पत्या व्यापारम् कर्मव्युत्पत्या च फलं बोधयति। एवाञ्चाख्याते फलव्यापारयोः प्राधान्यमिति फलति। व्यापारमुख्यविशेष्यकशाब्दबोधो भवति वैयाकरणमते। प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधो भवति नैयायिकमते। अस्तु तत्र तिङ् वाच्यं संख्याविशिष्टं कारकम्। कालश्च व्यापारविशेषणम्। इदमेव व्याकरणं खलु भाषायाः द्योतकम्।

तच्च व्याकरणं वाग्विज्ञानम्। विज्ञानमाधारीकृत्य वाग् वैखरीत्वमापद्यते। कथ्यते यत् प्रत्ययप्रधानभूतभाषा अश्लिष्टा भवन्ति। अत्र प्रकृतिप्रत्ययभागः सदा प्रत्यक्षरूपेणैव विराजते। किम्वा विभक्तिप्रधानाः खलु भाषाः श्लिष्टाः संजायन्ते। प्रकृतिप्रत्यययोः पूर्णतः समाहार एव एतद् वैलक्षण्यमालक्ष्यते। नहि प्रत्ययप्रधानभाषावद् विभक्तिरूपप्रत्ययानां सर्वतः पृथक्दर्शनं भवति।

अथ च **भाषा तदाश्रितं विज्ञानम्, तयोः भाषाविज्ञानयोः** परस्परं मिथकं दृश्यते एव। सहैवान्योन्याश्रयत्वमपि दृश्यते। यतोहि शब्दाः वर्णाश्रिताः भवन्ति। वाक्यानि शब्दगतानि भवन्ति। एकतिङ् वाक्यं मञ्जूषायाम्। पदसमूहो वाक्यम् इति विदुषां मतम्। इदं तु व्याकरणं भाषाद्योतकम्। यथा हि उच्चावचेष्वर्थेषु निपतन्ति निपाताः द्योतका भवन्ति। निपातानां द्योतकत्वविचारे खलु निश्चयेन एतेषां विचारः प्रस्फुटितः। वस्तुतो यथा धातूपसर्गयोः

कार्यमन्तरङ्गम्- पूर्वं धातुः उपसर्गेण युज्यते, पश्चात् साधनेनेति पूर्वपक्षः, किन्तु सिद्धान्ते तु पूर्वं धातुः साधनेन युज्यते, पश्चादुपसर्गेण। तत्रापि साधनं हि क्रियां निर्वर्तयति। साधनसम्बन्धं विना क्रियायाः साध्यत्वेन प्रतीतिर्न स्यात्, तां विना क्रियायोगे विहितोपसर्गसंज्ञकशब्दैर्योगाज्ञानादिति अनेकार्थत्वाद् धातूनां विशिष्टोऽर्थो धातोरेव, उपसर्गास्तु बोद्धारं प्रति तदर्थद्योतक इति मन्यते विद्वद्भिर्व्याकरणैः।

भाषाविज्ञानमाधारीकृत्यैव निरुक्तकार अपि उपमार्थे, अपि कर्मोपसंग्रहार्थे, अपि पदपूरणः। अत्र कर्मशब्दो हि प्रायेणार्थपर्यायवचनम्, एतस्मिन् शास्त्रे- **गतिकर्माण उत्तरे धातव**[5] **इति** गत्यर्थो गम्यते। तथा चार्थोपसंग्रहार्थः। पदमेव पूरयितव्यमर्थो येषां ते पदपूरणाः। अत्र त्रिधा ते अर्थभेदाद्भवन्ति। तेषामेते चत्वार उपमार्थे भवन्ति। इवेति भाषायां चान्वध्यायं च। अर्थात् उपमार्थे भवति, विपरिणतवचनमनुवर्तते अर्थवशात्।

**भाषायामर्थात् लोके, अन्वध्यायमर्थात् छन्दसि च। समुदाहरति-अग्निरिवेन्द्र इवेति।**[7]

अग्रे नेति प्रतिषेधार्थीयो भाषायाम्। अत्र प्रतिषेधो निषेध इति अनर्थान्तरम्। सोऽर्थो यस्य स प्रतिषेधार्थः, स एव प्रतिषेधार्थीयः। गहादित्वात् पा.- ४/२/१३८ इत्यनेन स्वार्थे छस्येयादेशः। व्यवहारे यदा घटो नास्ति पटो नास्ति कथ्यते तदा नशब्दोऽत्रास्तित्वं बोधयति। अर्थात् सत्तां विद्यमानतां प्रतिषेधयति।

एतेन दृश्यते यत् शाब्दीयव्याकरणे-अनुभूयते सुखम्, साक्षात्क्रियते गुरुः इत्यादौ निपातानां द्योतकत्वमेव। अतोऽनुभवसाक्षात्काररूप-फलयोर्धात्वर्थत्वेन भूधातुकृधात्वोः सकर्मकत्वम्। द्योतकत्वं चात्र प्रायेण समभिव्याहृतनिष्ठवृत्त्युद्बोधकत्वम्, क्वचित्तु कर्मप्रवचनीयानां सम्बन्धपरिच्छेदकत्वमपि, एतेन उपसर्गाणां द्योतकत्वम्। तदितरनिपातानां वाचकत्वम्, कोशादिप्रमाणत्वात्, तत्रोचितम्, वैषम्ये बीजाभावात्।

भाषाव्यवहारकाले क्वचिच्च वाचकत्वं क्वचिच्च द्योतकत्वमिति फलाश्रयतया कर्मसंज्ञकस्य धात्वर्थफल एव औचित्येन द्योतकत्वमेव आवश्यकम् इति विदुषां मतमुपस्थापितं शास्त्रे।

अथ च भाषाश्रिता विज्ञानं, तस्य विज्ञानस्य भाषामुपगतानां प्रकृतिप्रत्ययादीनां द्योतकत्व-वाचकत्वाभ्यां परस्परान्विताभ्याम् अत्र संविवेचना प्रस्तुता वर्तते।

**सन्दर्भाः -**

१. निरुक्ते - १/४
२. पा.सूत्रम् ३/२/१०८
३. पा.सूत्रम् ७/२/८८
४. वाक्यविज्ञानप्रसङ्गे भर्तृहरिणा शब्दब्रह्मविषये ध्वनितम्।
५. वाक्यपदीये प्रथमावतरणे ध्वनितम्।
६. निरुक्ते दुर्गवृत्तौ टीकायाम् ३/२/३ तमे।
७. ऋग्वेदसंहिता, ८/३/१९/२

# विस्थापनस्य कविताः

❑ हिन्दीमूलम् - अग्निशेखरः, अनुवादकः - कौशलः तिवारी

(1) **वर्षाः**

मम छिद्रिताकाशोपरि प्रवहति
स्मृतीनां नदी,
ओ मातृभूमे!
किमिदानीं भवन्ति
मम ग्रामे वर्षाः ।।

(2) **आकुलत्वम्**

कुरु ममाऽपहरणं
नय मां स्वयातनाशिविरं
किमपि न कथयिष्याम्यहम्,
कुरु, यत्किमपि कर्तुमिच्छसि
मम देहेन सह
जीविते सति दह,
कृन्त,
कुत्रचिन्मां निखन
नद्याः तटे
हिमाच्छादितपर्वतेषु
कस्मिन्नपि ग्रामे नगरवीथ्यां वा
कुत्रचिदवस्करनिचयाधः,
तृष्याम्यहं
स्वभूमिं स्पर्ष्टुम्।।

(3) **अस्थीनि**

हे पुरातत्वविद् भविष्य!
जीविष्यन्ति तव समक्षम्
एषु स्थानेषु
निष्पापास्थीन्यस्माकं
कथयिष्यन्ति च त्वां
प्रवाहयाऽस्मान् कश्मीरं गत्वा
वितस्तानद्याम्।
उन्मीलिष्यतः तव नेत्रे तदा
यथा उन्मीलिताः शब्दानामर्थाः
कदाचिद् स्वयमेव,
एकस्थानेषु
उद्गमिष्यन्ति
कानिचिन्निराशतृणानि
त्यक्तस्मरणलिप्तानि ॥

(4) **सेतौ गौः**

सर्वत्र वर्तते निःशब्दहिमम्
अस्माकं दग्धगृहेभ्य
ऊर्ध्वतराः सन्ति
पर्णहीनवृक्षाः।
एका मार्गभ्रष्टा गौः
सेतुतः पश्यति
रक्तनदीं
रम्भित्वा करोति
गगने विवरम् ।
छिक्कां करोति यदा मम जननी
अत्र विस्थापने
तां स्मरति गौः,
नैकवर्षानन्तरमपि
नैव विरमति रक्तनदी,
पारे तिष्ठति गौः
पारेऽस्मिन् वर्तते मम माता
तथा च गगने जायमानं वर्तते
गभीरं विवरम्।।

(5) **भयमुक्ताः**

गृहान्तरे त्रास आसीद्
गृहाद् बहिरप्यासीत् संङ्कटः,
तैः करुणाकृता
दशां दृष्ट्वा ऽस्माकम्
आनुपूर्व्येण
तैर्भस्मसात् कृताः।
अस्माकं गृहाः,
इदानीमन्तरे नास्ति त्रासो
नैव च बहिरस्ति सङ्कटः।।

(6) **निमज्जामः**

प्रविशामो वयम्
अवतीर्य पर्वतेभ्यः
कर्दमे,
कमाह्वयेम रात्रे
'अस्मिन् प्रहरे,
दूरं यावज्जले
दोलायते
अर्धक्रोशस्य चन्द्रः,
विविक्ते निमज्जामो वयम्।।

- बारां, राजस्थानम्
मो. ९४६००० ४२४४

पत्रिकासमीक्षा

# साहित्यमन्दाकिनी पत्रिका

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

राजस्थाने जयपुरनगरसमीपस्थे शाहपुरानाम्नि उपनगरे कार्यरतमस्ति 'राजस्थान ग्रामोत्थान एवं संस्कृत-अनुसन्धान संस्थानं'येन समये-समये विविधाः संस्कृतवाङ्मयविवेचनपराः कार्यक्रमा आयोज्यन्ते। संस्थानस्यास्य मुखपत्रिका 'साहित्यमन्दाकिनी' नाम्नी दशवर्षेभ्यः प्रकाश्यते। त्रैमासिकी सेयं पत्रिका संस्कृते हिन्दीभाषायां च विदुषां कृतीः प्रकाशयति। संस्थानेनानेन गते मार्चमासे (20.21.22 दिनाङ्केषु) संस्कृत-नाट्यशास्त्र-नाट्यकलादिभ्यः समर्पितस्त्रिदिवसीयो राष्ट्रीयनाट्यमहोत्सवः शाहपुरोपनगरे समायोजितोऽभूद् यस्मिन् संस्कृतनाटकादयः प्रस्तुता अभूवन्।

एतस्मिन्नेवावसरे संस्थानस्य मुखपत्रिकायाः 'साहित्यमन्दाकिन्या' नाट्यविशेषाङ्कः प्रकाशितोऽस्ति यस्मिन् नाट्यशास्त्रविषयका नाट्यकलाविषयकाश्च लेखाः प्रकाशिताः सन्ति। संस्थाननिदेशकस्य डॉ. शङ्करलालशास्त्रिणः, सुप्रथितस्य विद्वन्मूर्धन्यस्य प्रो. अभिराजराजेन्द्र-मिश्रस्य, देवर्षि कलानाथशास्त्रिणः अन्येषां च लेखाः संस्कृतनाटकवाङ्मयाधारिता अस्मिन् विशेषाङ्के प्रकाशिताः सन्ति। प्रारम्भे लोकसभाध्यक्षस्य, इसरो (भारतीय अन्तरिक्ष-अनुसंधान संगठन) प्रमुखस्य डॉ. एस. सोमनाथस्य, अन्येषां महापुरुषाणाञ्च शुभकामनासन्देशाः प्रकाशिताः सन्ति।

साहित्यमन्दाकिनी (नाट्यविशेषाङ्कः) वर्ष 10, अङ्क 1-2 (संयुक्ताङ्कः) सम्पादकः डॉ. शङ्करलाल शास्त्री, प्रकाशक- राजस्थान ग्रामोत्थान एवं संस्कृत अनुसन्धान संस्थान, शाहपुरा, जयपुर, मू. 50/-, वार्षिकमूल्यम् 200/-

**ऐसे बन सकते हैं आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 250/-, पंचवर्षीय शुल्क 1100/-, आजीवन सदस्यता ( 15 वर्ष ) शुल्क 3100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या - 2139101912498
IFS Code - CNRB0002139

# आधुनिकसंस्कृतसाहित्यसङ्कलनपरियोजना

वाराणस्यां बी.एच.यू. क्षेत्रे 'प्रज्ञकीर्तिप्राच्य शोधसंस्थान' नाम्नी संस्कृतसेवासंस्था स्थापिताऽस्ति या सम्प्रत्याधुनिकसंस्कृतसाहित्यसमृद्धिं नितान्त-मवलोकयन्ती आधुनिकसंस्कृतसाहित्यसङ्कलन-परियोजनां प्रारभते इति सूचनाऽस्माभिरधिगता। एकस्मिन् पत्रे संस्थानेन सूचितमस्ति यत् काशी संस्कृतसमृद्धिनगरी वर्तते किन्त्वस्याः पुस्तकालयेषु न संगृहीतान्याधुनिकसंस्कृतसाहित्यस्यानुदिनं प्रचीयमानान्यपि पुस्तकानि। अतः संस्थानेन समग्रेऽपि देशे संस्कृत सेवकाः प्रार्थ्यन्ते यद् विविधैः स्वरूपैराधुनिकसंस्कृतसाहित्यजगति यानि प्रकाशनानि समवतरन्ति तानि यदि संस्थानस्यास्यै योजनायै प्रहीयन्ते तर्हि तेषां सङ्कलनमत्र युगस्यास्य महान्तमुपकारं कुर्यात्। अध्ययन-शोधादिकार्याणि सुतरां प्रचलेयुः।

संस्थानस्यास्य संरक्षकमण्डले प्रतिनिधिमण्डले च देशस्य सर्वेभ्योऽञ्चलेभ्यः संस्कृतविद्वांसः संस्कृतसेविनश्च समाविष्टाः सन्ति। संस्थानेन प्रज्ञकीर्ति नाम्नी समीक्षा पत्रिकाऽपि षाण्मासिकरूपेण प्रकाश्यते। संस्थानस्याध्यक्षपदे डॉ. ज्ञानप्रकाश त्रिपाठिनः सचिवपदे च डॉ. प्रतापकुमारमिश्रस्य नाम सूचितमस्ति।

संस्थानस्य सोऽयमनुरोधः संस्कृतसेवकानां कृते सादरं प्रसार्यमाणोऽस्ति यत् संस्कृतसाहित्यस्य कस्यामपि विधायां रचनात्मककार्ये व्यापृताः साहित्यकाराः शास्त्रकाराः, साहित्यसमीक्षकाः अन्ये वा सम्बद्धाः सज्जनाः स्वकीयायाः प्रकाशितायाः कृतेरेकां प्रतिं संस्थानाय प्रेषयेयुः। अस्माकं त्वयमपि परामर्शोऽस्ति यत् प्रकाशनानां संग्रहणाय व्यक्तिशोऽपि कस्यचन प्रतिनिधेर्माध्यमेन प्रयासः क्रियेत चेत् परिणामा वैविध्येन प्राप्येरन्। संस्थानस्य वर्धापनं कुर्वाणा वयं सूचनार्थमिदं निवेदनं प्रसारयामः।

**संस्थानस्य सङ्केतोऽस्ति –**

सचिव, प्रज्ञकीर्तिप्राच्यशोधसंस्थान, आराजी नं. 469, सत्यम् नगर कॉलोनी, भगवानपुर, बी.एच.यू., वाराणसी, उ.प्र.–221005, दूरभाष 9415697016, 6392053732

– प्रधानसम्पादकः

नारी-स्तम्भः

# नमः शिवायै गङ्गायै शिवदायै नमो नमः

❑ डॉ. राजेश्वरी भट्टः

गङ्गा भारतदेशस्य पवित्रतमा नदी वर्तते। हिन्दूपरम्परायां गङ्गा देवीव आराध्यते मातृवच्च मान्यते।

हिन्दूनां जीवने जन्मनो मृत्युपर्यन्तं आयोज्यमानाः षोडशसंस्कारा अन्यधार्मिक-कार्याणि च गंगाजलेनैव सम्पद्यन्ते। मन्यते यत् शंकरमौलिविहारिणी पावनी गंगा नदी येषु येषु जनपदेषु वहति त एव जनपदाः पर्वता-आश्रमाश्च धन्य-धन्याः सन्ति। मन्यते यत् यज्ञ-तप-दान-ब्रह्मचर्यादीनामनुष्ठानेनापि साधकस्तत् पुण्यं न लभते यत् गंगास्नानेनाधिगच्छति। कथितञ्च -

तपसा ब्रह्मचर्येण यज्ञैस्त्यागेन वा पुनः।
गतिं न लभते जन्तुर्गङ्गां संसेव्य यां लभेत
(पद्म.पु. ८२/२४)

मन्यते यत्, मरणासन्नमानवस्य मुखे पातिता गंगाजलस्य बिन्दवः तस्य कृते मोक्षद्वार-मुद्घाटयन्ति। किमधिकं स्वयं यमराजोऽपि तं नेतुमसमर्थोऽस्ति। अस्मिन् प्रसंगे जगद्गुरुः शंकराचार्यः स्वयं कथयति -

भगवद्गीता किञ्चिदधीता
गंगाजललवकणिका पीता।
सकृदपि यस्य मुरारिसमर्चा
तस्य यमः किं कुरुते चर्चा।।
चर्पटमञ्जरी शंकराचार्यः

आत्मनि अन्तर्निहितेन अलौकिकसामर्थ्येन भक्तानां उद्धाराय सुरदेवी गंगा भागीरथी-जाह्नवी-विष्णुपदी भगवत्पदी इत्यादिभिर्नामभिः भूलोकेऽवतीर्य भक्तानां मनोरथानपूरयत्। धार्मिके पौराणिकेन महत्त्वेन सह वैज्ञानिकदृष्ट्याऽपि गंगाजलं अमृतकल्पं वर्तते। गंगाजले 'गन्धक' इति शोधकपदार्थः प्राचुर्येण प्राप्यते येन गंगाजले दीर्घकालं यावद् विकृतिर्न जायते। अतो गंगाजले रोगाणां कीटाणवोऽपि न जायन्ते। ऐतिहासिक-दृष्ट्याऽपि गंगानद्याः महत्त्वं अविस्मरणीयं वर्तते। को न जानाति यत् गंगा-नद्याः विशालं प्राङ्गणं नैकासां सभ्यतानां विकासस्थली वर्तते। उत्तरभारतदेशस्य कृषि-मत्स्यपालन-पर्यटनादीनि साधननि अस्मिन् प्रसंगे अर्थागमस्य महत्त्वपूर्णानि स्रोतांसि वर्तन्ते। गंगाजलं वस्तुतो भूलोकवासिनां कृते सुखसौभाग्यस्य सहजं साधनं वर्तते। रामायण-महाभारत-भागवतपुराणादिक-धर्मग्रन्थेषु गंगायाः गंगाजलस्य च भव्यमहिम्नो वर्णनं प्राप्यते। अस्मिन् प्रसंगे पण्डितराज जगन्नाथ- विरचितोऽयं श्लोकोऽत्रोल्लेखनीयोऽस्ति-

समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्-
महैश्वर्यलीलाजनितजगतः खण्डपरशोः।
श्रुतीनां सर्वस्वं सुकृतमथ मूर्तं सुमनसां
सुधासौन्दर्यं ते सलिलमशिवं नः शमयतु।।
(गंगालहरी-१)

किन्तु अत्यन्तं खेदावहोऽस्ति यत् गंगाजलस्य दिव्यगुणैश्चमत्कारैश्च सुपरिचिता केचिद् आत्मघ्नो जना अमृतमयं गंगाजलं, औद्योगिकैरप-शिष्टै रासायनिकैर्द्रव्यैर्वस्त्रप्रक्षालनेन-मलादीनां विसर्जनेन सततं प्रदूषयन्ति। गंगायाः प्रदूषणेन चिन्तिताः पर्यावरणविदो वैज्ञानिकाः सर्वकारश्च गंगायाः शुद्धिकरणस्य दिशायां प्रयत्नवन्तः सन्ति। हर्षस्य विषयोऽयं वर्तते यत् केन्द्रसर्वकारेण राष्ट्रीयनद्याः गंगायाः संरक्षणाय प्रदूषणोन्मूलनाय

**२०१४ तमे वर्षे 'नमामि गङ्गे' इति अभियानं प्रारब्धम्। नूनं जन-जागरणेन समवेतप्रयत्नेन च अमृतमये गंगाजलं युगयुगेभ्यो मानवानां शं विधास्यति।**

## हिन्दी अनुवाद

गंगा भारतवर्ष की पवित्रतम नदी है। हिन्दू परम्परा में गंगा देवी की भाँति आराध्या एवं माता के समान मान्य है। हिन्दुओं के जीवन में जन्म से मृत्यु तक आयोजित होने वाले षोडश संस्कार तथा अन्य धार्मिक कार्यों में गंगाजल अपेक्षित है। मान्यता है कि जिन-जिन जनपदों में होकर गंगा नदी बहती है वे जनपद, पर्वत एवं आश्रम धन्य-धन्य हैं। कहते हैं कि यज्ञ-तप-दान-ब्रह्मचर्यादि अनुष्ठानों से भी साधक वह पुण्य प्राप्त नहीं करता जितना गंगाजल के सेवन से प्राप्त करता है- पद्म.पु. 82/24। लोकमान्यता है कि मरणासन्न व्यक्ति के मुख में डाली गई गंगाजल की बूँदे उसके लिए मोक्ष का द्वार उद्घाटित कर देती हैं। अधिक क्या कहें स्वयं यमराज भी उस व्यक्ति को ले जाने में असमर्थ है। इस प्रसंग में शंकराचार्य का यह श्लोक उल्लेखनीय है।

जिस व्यक्ति ने गीता का थोड़ा भी अध्ययन किया है, गंगाजल की कुछ बूँदों का पान किया है, एक बार भी श्रद्धा से मुरारि का अर्चन किया हे, यमराज भी उसका कुछ नहीं बिगाड़ सकता है।

– जगद्गुरु शंकराचार्य/चर्पटमञ्जरी

अपनी अन्तर्निहित अलौकिक सामर्थ्य से भक्तों के उद्धार के लिए सुर देवी गंगा ने भागीरथी जाह्नवी-विष्णुपदी भगवत्पदी आदि नामों से पृथ्वी पर अवतरित होकर भक्तों के मनोरथ को पूर्ण किया है। धार्मिक एवं पौराणिक महत्व के साथ वैज्ञानिक दृष्टि से भी गंगाजल अमृत तुल्य है। गंगाजल में गन्धक नामक शोधक पदार्थ पाया जाता है जिससे दीर्घकाल तक गंगाजल में विकृति नहीं होती है। गंगाजल में ऑक्सीजन (प्राणवायु) को सोखने की अद्भुत क्षमता होती है। अत: गंगाजल में रोग के कीटाणु नहीं पनपते। कौन नहीं जानता है कि गंगा के विशाल प्राङ्गण में अनेक सभ्यताओं का विकास हुआ है। उत्तर भारत की अर्थव्यवस्था में भी गंगा नदी का महत्त्वपूर्ण योगदान है। गंगा से प्राप्त होने वाले कृषि, मत्स्यपालन, पर्यटन आदि अर्थप्राप्ति के महत्वपूर्ण माध्यम हैं। गंगाजल वास्तव में भूलोकवासियों के लिए सुख, सौभाग्य एवं समृद्धि का सहज साधन है। रामायण, महाभारत, भागवतपुराण आदि धर्मग्रन्थों में गंगा एवं गंगाजल की भव्य-महिमा का वर्णन प्राप्त होता है। इस प्रसंग में पं. राज जगन्नाथ का यह श्लोक उल्लेखनीय है –

'हे मात: गङ्गे! आप समस्त भूमण्डल का सौभाग्य स्वरूप हैं तथा संसार को उत्पन्न करने वाले शंकर की महाविभूति हैं, वेदों का सार है, देवों की पुण्यभूमि हैं, अमृत के समान आपका निर्मल एवं पवित्र जल हमारे अमंगल का नाश करे।।'

– पं. जगन्नाथ, गंगालहरी।

किन्तु खेद का विषय है कि गंगाजल के दिव्य गुणों एवं चमत्कारों से परिचित होने पर भी कुछ आत्मघाती जन पवित्र एवं अमृत तुल्य गंगाजल को औद्योगिक अपशिष्टों, रासायनिक द्रव्यों, वस्त्रप्रक्षालन, मूत्र विसर्जन आदि से सतत गति से प्रदूषित कर रहे हैं। गंगा के प्रदूषण से चिन्तित पर्यावरणविद्-वैज्ञानिक एवं सरकार ने राष्ट्रीय नदी गंगा के संरक्षण के लिए एवं प्रदूषण उन्मूलन के लिए 2014 ई. से 'नमामि गङ्गे' अभियान प्रारम्भ किया है। निश्चय ही जन-जागरण एवं समवेत प्रयत्नों से अमृत के समान पवित्र जल युगों-युगों तक मानव का कल्याण करेगा।

आयुर्वेद-स्तम्भः

# रोगान् योगोऽपकर्षति

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**प्राचीनकाले जनानां दिनचर्याऽति व्यवस्थिताऽऽसीत्। अधिसङ्ख्यजनानामाहारे विहारे च सुनियतताऽऽसीद्विशेषेण तु सर्वेषां जनानां निद्राकालः रात्रेः प्रथमे प्रहरे सुनिश्चित आसीत्। तेन हि जनाः समुचितं निद्रोपभोगं कृत्वा स्वत एव ब्राह्मे मुहूर्ते शय्यात्यागं कुर्वन्ति स्म। उत्थाय च नियतरूपेण मूत्रपुरीषादेः कृतशौचविधानास्ते नियतस्य सद्वृत्तस्य परिपालनं कुर्वन्ति स्म, यस्मिन् दन्तपवन-चङ्क्रमण-योगासन-प्राणायाम-व्यायामाभ्यङ्गोद्वर्तन-स्नान-स्वच्छवस्त्रधारणादीनां शरीरसंरक्षणकराणां नित्यकरणीयानां कर्मणां सम्पादनङ्कृत्वा तदनन्तरमेव केचिद्धर्मपरायणास्ते सन्ध्या-जप-तप-होम-नियम-प्रायश्चित्तादीनां यथाविधि सम्पादनङ्कुर्वन्ति स्म।**

प्राचीन काल में लोगों की दिनचर्या अत्यन्त ही व्यवस्थित थी। अधिकांश लोगों के आहार में एवं विहार में सुनिश्चितता थी, विशेष रूप से तो सभी लोगों का निद्रा का समय रात्रि के प्रथम प्रहर में सुनिश्चित था। उससे निश्चित रूप से ही लोग अभ्यस्त (एवं उपयुक्त) निद्रा का उपभोग करके अपने आप ही ब्राह्म मुहूर्त में शय्यात्याग कर देते थे और उठकर नियत रूप से मूत्र एवं पुरीष इत्यादि के उत्सर्जनपूर्वक शौच के विधान को सम्पन्न किए हुए लोग नियत (निश्चित) सद्वृत्त का परिपालन करते थे, जिसमें दातुन करना, प्रातःकालीन भ्रमण करना, योगासन, प्राणायाम, व्यायाम, अभ्यङ्ग, उबटन, स्नान एवं स्वच्छ वस्त्रधारण इत्यादि शरीर का संरक्षण करने वाले नित्य करने योग्य कर्मों को सम्पादित करके उसके बाद ही कुछ धर्मपरायण वे लोग सन्ध्या, जप, तप,होम, नियम एवं प्रायश्चित्त इत्यादि को यथाविधि सम्पन्न करते थे।

**अन्ये च यथास्वं स्वे स्वे नियते कर्मणि निरता आत्मतोषमनुभवन्ति स्म। सर्वेऽपि च यथाशक्ति स्वधर्मानुरूपं धार्मिकप्रक्रियाणामपि च सम्पादनं नियमितरूपेण कुर्वन्ति स्म। यतो हि शास्त्रेषु निर्दिष्टोऽस्ति यत्-सर्वभूतानां सर्वाः प्रवृत्तयः सुखार्थाः भवन्ति, सुखं च न विना धर्मात्तस्माद्धर्मपरो भवेत्। एतदतिरिक्तं धर्मपरायणास्ते नियमितरूपेण देवगोविप्रवृद्ध-वैद्यनृपातिथीनामर्चनमपि यथाशक्ति सम्पाद्य सामाजिकतामप्यनुकरणार्थं प्रदर्शयन्ति स्म। एतादृग्विधाः जनाः प्रायः शारीरिकरूपेण मानसिकरूपेण च स्वस्थाः भवन्ति स्म।**

और अन्य कुछ लोग अपने-आप अपने-अपने नियत कर्म में निरत हुए वे लोग आत्मसन्तोष का अनुभव करते थे और सभी लोग यथाशक्ति अपने धर्म के अनुरूप धार्मिक-प्रक्रियाओं को भी नियमित रूप से सम्पन्न करते थे। क्योंकि शास्त्रों में यह निर्दिष्ट है कि

सभी प्राणियों की सभी प्रवृत्तियाँ सुख के लिए होती हैं और सुख तो धर्म के बिना प्राप्त नहीं होता है, इसलिए धर्मपरायण होना चाहिए। इसके अतिरिक्त धर्मपरायण वे लोग नियमित रूप से देवता, गाय, ब्राह्मण, वृद्ध व्यक्ति, वैद्य, राजा और अतिथियों का आदर-सत्कार भी यथाशक्ति सम्पन्न करके अनुकरण करने के लिए सामाजिकता का भी प्रदर्शन करते थे। इस प्रकार के लोग प्राय: शारीरिक रूप से एवं मानसिक रूप से स्वस्थ हुआ करते थे।

**एतादृशाः अतिविमलविपुलप्रभावाः प्रत्यक्षदेव-देवर्षिधर्मयज्ञविधिविधानाः शैलसारसंहत-स्थिरशरीराः प्रसन्नवर्णेन्द्रियाः समुचितबलजव-पराक्रमाश्च ते सत्यार्जवानृशंस्यदानदमनियम-तपोपवासब्रह्मचर्यव्रतपरा व्यपगतभयरागद्वेष-मोहलोभक्रोधशोकमानरोगनिद्रातन्द्राश्रमक्लमाल-स्यपरिग्रहाश्च पुरुषा बभूवुर्नियतायुषः।**

इस प्रकार के लोग अत्यन्त निर्मल एवं श्रेष्ठ प्रभाव वाले तथा प्रत्यक्ष रूप में देव, देवर्षि, धर्म और यज्ञकर्म का अनुष्ठान विधिविधान से करने वाले, पर्वत के समान दृढ़ एवं स्थिर शरीर वाले, उज्ज्वल वर्ण वाले तथा निर्मल इन्द्रियों वाले एवं उपयुक्त बल एवं वेग वाले तथा श्रेष्ठ पराक्रम वाले वे सत्यवादी, सरल एवं सीधे स्वभाव वाले, अक्रूर (दयावान्), दान करने वाले,इन्द्रियों एवं मन को वश में रखने वाले, नियम का परिपालन करने वाले, तप, उपवास, ब्रह्मचर्य एवं व्रतपरायण वे लोग भय, राग, द्वेष, मोह, क्रोध, शोक, मान, रोग, निद्रा, तन्द्रा, श्रम (शारीरिक थकान), क्लम (मानसिक थकान), आलस्य एवं परिग्रह (धन-सम्पत्ति का संग्रह करना) ये सब दूर हो गए हैं जिनके ऐसे वे, नियत आयु वाले हुए।

**वर्तमानकाले तु कालप्रभावात् सुखात्मकानामुपकरणानां विधीनाञ्चाविष्कारेणोपलब्धानां सुखसाधनानामुपभोगे निरताः केचिज्जना अलसीभूताः क्रमाणामुपर्युक्तानां परिपालनं नैव कुर्वन्ति। स्वस्थवृत्तपरिपालनक्रमे च परमावश्य-कानामाहार-निद्रा-ब्रह्मचर्यात्मकानामुपस्तम्भ-त्रयाणामप्यनुपालनं सम्यक्तया नैव कुर्वन्ति। अत एव विविधैर्व्याधिभिः ग्रस्तास्ते दुःखमनुभवन्ति।**

वर्तमानकाल में तो काल के प्रभाव से सुखस्वरूपक उपकरणों के एवं विधियों के आविष्कार से उपलब्ध सुख-साधनों का उपभोग करने में लगे हुए आलसी हुए कुछ लोग इन उपयुक्त क्रमों का परिपालन नहीं करते हैं तथा स्वस्थवृत्त के परिपालन के क्रम में परमावश्यक आहार, निद्रा और ब्रह्मचर्य स्वरूप के इन तीन उपस्तम्भों का अनुपालन भी सम्यक् प्रकार से नहीं करते हैं इसलिए अनेक प्रकार की व्याधियों से ग्रस्त वे लोग दुःख का अनुभव करते हैं।

**अन्ये च बुद्धिमन्तः केचिज्जनाः आविष्कृत-तमानां सुखसाधनानामुपभोगं संयतरूपेण कुर्वन्ति नियतरूपेण च सद्वृत्तस्य परिपालनमपि कुर्वन्ति, विशेषेण तु चङ्क्रमणे योगासनप्राणा-यामेत्यादिसरलस्वरूपात्मकेषु योगविधिष्वपि चाकर्षितास्ते शरीरमनसोः स्वास्थ्यानुवर्तने दत्तावधानाः कायवाक्चेतसां नियन्त्रणे किञ्चित्समर्थास्ते सुखसञ्ज्ञकमारोग्यमनुभवन्ति। सञ्ज्ञकग्रहणात्परमार्थतो यदसुखं तदपि गृह्यते,**

**पारमार्थिकः सुखस्तु मोक्ष एवास्तीति निगदितं महर्षिभिः।तदपि च योगेनैवावाप्यते।**

और अन्य कुछ बुद्धिमान् लोग आविष्कृततम सुख-साधनों का उपभोग नियन्त्रित रूप से करते हैं और निश्चित रूप से सद्वृत्त का परिपालन भी करते हैं, विशेष रूप से तो (प्रातःकालीन या सायङ्कालीन) भ्रमण करने में तथा योगासन, प्राणायाम इत्यादि सरल स्वरूप वाली योग-विधियों में भी आकर्षित हुए तथा शरीर और मन के स्वास्थ्य का अनुवर्तन करने में सावधान शरीर, वाणी और चित्त के नियन्त्रण में भी किञ्चित् समर्थ वे लोग सुखसञ्ज्ञक आरोग्य का अनुभव करते हैं। 'सञ्ज्ञक' इस पद का ग्रहण करने से जो पारमार्थिक सुख नहीं है उसका भी सुख रूप में ग्रहण कर लिया जाता है,पारमार्थिक सुख तो मोक्ष ही है, ऐसा महर्षियों ने कहा है और वह भी योग से ही प्राप्त किया जाता है।

**21 जून 2024 इत्यात्मकस्यास्य दिवसस्यान्तर-राष्ट्रिययोगदिवसरूपेणाखिले हि विश्वे समारोह-पूर्वकं स्वागतं करिष्यन्त्यधिसङ्ख्यजनाः। दशमो ह्ययं योगदिवसः। यद्यपि प्राचीनकालत एव योगस्य पर्याप्तं प्रचलनमस्त्यस्मिन्नध्यात्म-प्रधाने भारतदेशे तर्ह्यपि नवीनासु शासकीय-व्यवस्थासु वैश्विकप्रसारे विशिष्टं संरक्षणं सम्प्राप्तमनेन योगेन।**

21 जून 2024 के इस दिवस का अन्तरराष्ट्रीय योग दिवस के रूप में सम्पूर्ण विश्व में समारोहपूर्वक अधिकांश लोग स्वागत करेंगे। यह दसवाँ योगदिवस है। यद्यपि प्राचीनकाल से ही इस अध्यात्मप्रधान भारतदेश में योग का पर्याप्त प्रचलन रहा है फिर भी नवीन शासकीय व्यवस्थाओं में इस योग के द्वारा वैश्विक प्रसार में विशिष्ट संरक्षण प्राप्त किया गया है।

**'संयुक्तराष्ट्रसंघ' इति नाम्ना प्रसिद्धेन वैश्विकसर्वकाराणां सङ्गठनेन 2014 इति ख्रिस्तीये वर्षे प्रस्तावसंख्या 69/131 इत्यनेनोद्घोषितं यद् '21 जून' इत्यात्मको ह्येषः दिवसः 'अन्तरराष्ट्रीय योगदिवसः' भविष्यतीति। तदनन्तरं 21 जून 2015 इति नियते दिवसे प्रथमः योगदिवसः विश्वस्यानेकेषु देशेषु मानितः पूजितश्च।**

संयुक्तराष्ट्रसंघ इस नाम से प्रसिद्ध विश्व की सरकारों के संगठन के द्वारा 2014 ई. वर्ष में प्रस्ताव संख्या 69/131 के द्वारा यह घोषित किया गया कि 21 जून का यह दिवस अन्तरराष्ट्रीय योगदिवस होगा। उसके बाद 21 जून 2015 के दिन इस नियत दिवस में विश्व के अनेक देशों में योगदिवस मनाया गया और पूजित किया गया।

**शब्दस्पर्शरूपरसगन्धात्मकाः पञ्चेन्द्रियार्थास्तु नियतैः समनस्कैस्तत्तदिन्द्रियैर्गृह्यन्ते। यथा हि शब्दस्तु सर्वदा समनस्केन श्रोत्रेन्द्रियेण स्पर्शस्तु त्वगिन्द्रियेणैव गृह्यते। शेषाण्यपि चेन्द्रियाणि स्वं स्वमर्थमेवमेव नियतरूपेण गृह्णन्ति, नान्यो नान्यमिति सुनिश्चितम्। एतेषां शब्दाद्यर्थानां समयोगातियोगायोगमिथ्यायोगाः भवन्ति। समयोगयुक्तास्तु गृहीतार्थाः प्रकृतिहेतवो भवन्ति तथाऽतियोगायोगमिथ्यायोगरूपेण गृहीतास्त्वेते विकाराणां हेतवो भवन्ति।**

शब्द, स्पर्श, रूप, रस एवं गन्ध ये पाँच इन्द्रियार्थ मनसहित उन उन नियत इन्द्रियों के द्वारा ग्रहण किए जाते हैं । जैसे कि शब्द तो सर्वदा मनसहित श्रोत्रेन्द्रिय के द्वारा और स्पर्श तो त्वगिन्द्रिय के द्वारा ही ग्रहण किया जाता है। शेष इन्द्रियाँ भी अपने-अपने अर्थ को इसी प्रकार से नियतरूप से ग्रहण करती हैं, एक दूसरे के विषय को ग्रहण नहीं करती हैं यह सुनिश्चित है। इन शब्दादि अर्थों के समयोग, अतियोग, अयोग और मिथ्यायोग होते हैं । समयोग से युक्त गृहीत किए गए अर्थ तो प्रकृति के (स्वास्थ्य के, आरोग्य के) हेतु होते हैं और अतियोग, अयोग तथा मिथ्यायोग के रूप में ग्रहण किए गए ये अतियोगादि विकारों के हेतु होते हैं।

**दुःखात्मकानामशान्तानां वेदनानामित्येतेऽतियोगादयस्त्रयो हेतवः स्मृताः। सुखहेतुस्त्वेकः समयोग एव भवति, स तु सुदुर्लभोऽस्ति। यतो हि विना मनस्त्विन्द्रियाण्यर्थानां ग्रहणेऽसमर्थानि भवन्ति मनश्च चञ्चलं प्रमाथि बलवद् दृढञ्च भवति, तस्य पूर्णरूपेण निग्रहं तु सुदुष्करं भवति। पुनरपि योगमाध्यमेन प्रारम्भिकरूपेण मनसः किञ्चिन्नियन्त्रणन्तु भवत्येव।**

दुःखस्वरूपक अशान्त वेदनाओं के अतियोग इत्यादि ये तीन हेतु माने गए हैं । सुख का हेतु तो एक समयोग ही होता है और वह तो अत्यन्त दुर्लभ है। क्योंकि मन के विना तो इन्द्रियाँ अपने अर्थों को ग्रहण करने में समर्थ नहीं होती हैं और मन तो चञ्चल, प्रमाथी (कष्ट देने वाला, क्षुब्ध करने वाला), बलवान् और दृढ होता है, उसका पूर्ण रूप में निग्रह करना (वश में करना) तो अत्यन्त ही कठिन होता है, फिर भी योग के माध्यम से प्रारम्भिक रूप से मन का कुछ नियन्त्रण तो होता ही है।

**अनेन नियन्त्रणेन आत्मेन्द्रियमनोर्थानां सन्निकर्षात् सुखस्वरूपात्मकानामर्थानां ग्रहणे मनसः प्रवृत्तिर्विशेषेण भवति। अतएव चित्तवृत्तिनिरोधात्मकस्त्वेषः योगः प्रारम्भिकरूपेण सुखदो भवति। अनन्तरन्तु कैश्चित् सुदक्षैर्योगिभिर्यदा मनसः नियन्त्रणं पूर्णरूपेण क्रियते तदा केवलात्मज्ञानस्थे मनसि स्थिरे सति विषयेभ्यः निवृत्तिर्भवति। एतादृग्विधस्तु योगो मोक्षप्रवर्तको भवति, सुदुर्लभन्त्वेतद् वशित्वं कश्चिद्विरल एव प्राप्नोति।**

इस नियन्त्रण से आत्मसंयुक्त, इन्द्रियाँ, मन और अर्थों के सन्निकर्ष से (संयोग से) सुखस्वरूपात्मक अर्थों का ग्रहण करने में मन की प्रवृत्ति विशेष रूप से होती है, इसलिए चित्तवृत्ति का निरोध करने वाला यह योग प्रारम्भिक रूप से सुख देने वाला होता है, बाद में तो कुछ अत्यन्त दक्ष योगियों के द्वारा जब मन का नियन्त्रण पूर्ण रूप से कर लिया जाता है तब आत्मज्ञान में स्थित मन के स्थिर हो जाने पर विषयों से (शब्दादि विषयों से) निवृत्ति हो जाती है। इस प्रकार का योग तो मोक्ष का प्रवर्तक होता है, अत्यन्त ही दुर्लभ यह वशित्व तो कोई विरला ही प्राप्त करता है ।

**चतुर्विंशतितत्त्वात्मकमेतच्छरीरं सर्वदा कर्मनिरतं भवति। कर्म तु वाङ्मनःशरीरप्रवृत्तिः। आचार्यश्चरकः कथयति यत् -**

चतुर्विंशतितत्त्ववाला यह शरीर सर्वदा कर्म में निरत होता है। कर्म तो वाणी, मन और शरीर की प्रवृत्ति को माना गया है, आचार्य चरक कहते हैं कि-

**तत्र वाङ्मनःशरीरातिप्रवृत्तिरतियोगः; सर्वशोऽप्रवृत्तिरयोगः; वेगधारणोदीरणविषमस्खलनपतनाङ्गप्रणिधानाङ्गप्रदूषणप्रहारमर्दनप्राणोपरोध सङ्क्लेशनादिः शारीरो मिथ्यायोगः, सूचकानृताकालकलहाप्रियाबद्धानुपचारपरुषवचनादि र्वाङ्मिथ्यायोगः, भयशोकक्रोधलोभमोहमानेर्ष्यामिथ्यादर्शनादिर्मानसो मिथ्यायोगः। योगेनातियोगायोगमिथ्यायोगात्मकेष्वेतेषु कर्मस्वपि नियन्त्रणम्भवति। मनसः दृढीकरणे समर्थो ह्येषः योगः शरीरस्य दृढीकरणेऽपि समर्थोऽस्ति।**

इस में वाणी, मन और शरीर की अत्यधिक प्रवृत्ति अतियोग होता है तथा सर्वथा प्रवृत्ति न होना ही अयोग है, उदीर्ण हुए (प्रेरित हुए मल-मूत्र आदि के) वेगों का धारण और उत्पन्न नहीं हुए वेगोंका बलपूर्वक उदीरण करना (प्रेरित करना), विषम स्थान पर चलना या फिसलना, नीचे गिरना, अङ्गों को विषम स्थिति में रखना, शरीर के अङ्गों का प्रदूषण करना (अर्थात् कण्डू इत्यादि अनावश्यक रूप से करना), अङ्गों पर प्रहार करना, अङ्गों का अनावश्यक रूप से मर्दन करना, प्राणवायु को (विधिरहित स्वरूप में) रोकना, शरीर का सङ्क्लेशन करना (अर्थात् मद्यपान, तीव्र आतपसेवन, अनावश्यक रूप से अति जलसिञ्चन इत्यादि से शरीर को कष्ट देना) इत्यादि शरीर के कर्मों का मिथ्यायोग है, चुगली करना, झूठ बोलना, असमय बोलना, कलह करने वाले वाक्य बोलना, अप्रिय बोलना, बिना प्रसङ्ग के बोलना, प्रतिकूल बोलना और कठोर वचनों को बोलना आदि वाणी के कर्मों का मिथ्या योग है। भय, शोक, क्रोध, लोभ, मोह, मान, ईर्ष्या और मिथ्यादर्शन (किसी वस्तु को गलत रूप में देखना) आदि मन के मिथ्यायोग हैं। योग के माध्यम से तो अतियोग, अयोग और मिथ्यायोग स्वरूप इन शरीर, वाणी और मन के कर्मों पर नियन्त्रण होता है, मन को दृढ़ करने में समर्थ यह योग शरीर को दृढ़ करने में भी समर्थ होता है।

**या चेष्टा शरीरचेष्टा स्थैर्यार्था बलवर्धिनी चास्ति सा तु देहव्यायामसङ्ख्याता। तान्तु मात्रया समाचरेदिति निर्दिशन्त्यायुर्वेदाचार्याः। देहस्य व्यायामो हि देहव्यायामो भवति, अत्र हि देहग्रहणान्मनोव्यायामं चिन्तनादिं निराकरोति। या च इष्टा (अभिप्रेता) इति यत् प्रोक्तं तेन तु भारहरणाद्याऽनिष्टा कार्यवशात् क्रियमाणा चेष्टा निरस्यते, चङ्क्रमणरूपा तु क्रिया 'इष्टा' इति पदेनैव प्राप्यते। एताः सर्वाः हि चेष्टाः मात्रया (अनपायिपरिमाणेन) करणीयाः सन्ति। नातिदेहपीडाकराभिरिष्टाभिरायुर्बलमेधाग्निप्रदाभिरिन्द्रियबोधनाभिश्चैताभिश्चेष्टाभिः सर्वदा सुखमेव प्राप्नोति जनः।**

जो इष्ट अर्थात् अभीष्ट (उपयुक्त) शरीरचेष्टा होती है वह शरीर को स्थिर करने के लिए (दृढ़ करने के लिए) और बल को बढाने वाली होती है वह तो देहव्यायाम की संज्ञावाली कही गई है, उसको तो मात्रापूर्वक करना चाहिए, ऐसा आयुर्वेद के आचार्य

कहते हैं। देह का व्यायाम निश्चित रूप से देह का ही व्यायाम होता है, यहाँ देह पद के ग्रहण करने से मन के व्यायाम चिन्तन आदि जो हैं उनका यह पद निराकरण (निषेध) करता है जो इष्टा अर्थात् अभिप्रेत (अभीष्ट, उपयुक्त) यह कहा गया है उससे तो जो अभीष्ट नहीं है अपितु कार्य के वशीभूत होकर की जाने वाली भारहरण इत्यादि चेष्टाएं हैं उनका निराकरण इस इष्टा पद से हो जाता है।भ्रमण करने रूपी जो क्रिया है वह तो इष्टा इस पद से ही प्राप्त हो जाती है,ये सभी चेष्टाएं मात्रापूर्वक अर्थात् जितना करने से हानि नहीं हो उस परिमाण से ही करने योग्य होती हैं, जो शरीर को अधिक पीड़ा करने वाली नहीं होती हैं ऐसी अभीष्ट चेष्टाएं आयु,बल, मेधा और अग्नि प्रदान करने वाली तथा इन्द्रियबोधन इत्यादि करने वाली इन चेष्टाओं से सर्वदा व्यक्ति सुख ही प्राप्त करता है।

**देहव्यायामस्तु बहुभिः प्रकारैः सम्पादनीयो वर्तते, तेषु केचित्प्रकाराः कदाचिद्धानिकारका अपि भवन्ति। किन्तु मात्रया सम्यग्रूपेण कृतानि सरलस्वरूपकात्मकानि योगासनानि सर्वदा हितमेव सम्पादयन्ति ।योगस्त्वष्टाङ्गो भवति, यथा हि- यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयश्चेति। एतेषु यम-नियम-आसन-प्राणायामानां बहवः प्रकाराः सुगमतया सम्पादनीयाः सन्ति, योगविशेषज्ञस्य साहाय्येनावश्यकरूपेण करणीयाः ह्येते यमादयश्चत्वारस्तु सुगमाः सुखदाश्च सन्ति पर्याप्तिञ्चाभिनिर्वर्तयन्ति।**

देहव्यायाम तो अनेक प्रकार से सम्पादन करने योग्य होता है, उसमें कुछ प्रकार तो कभी हानि करने वाले भी होते हैं किन्तु मात्रापूर्वक सम्यक् प्रकार से किए गए सरल स्वरूप वाले योगासन तो सर्वदा ही हित को ही सम्पन्न करते हैं। योग तो अष्टाङ्ग वाला होता है, जैसे- यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि।इनमें यम, नियम, आसन और प्राणायाम के बहुत से प्रकार सुगमतापूर्वक करने के योग्य होते हैं। योगविशेषज्ञ की सहायता से आवश्यक रूप से करने योग्य ये यमादि चार तो अत्यंत ही सुगम और सुख देने वाले हैं तथा पूर्णता को भी प्राप्त करवाते हैं।

**प्राथमिकरूपेणैतेषु दक्षतामवाप्याग्रिमेषु योगाङ्गेषु कृतश्रमः दत्तावधानः जनः श्रमानुरूपं किञ्चित्तु प्राप्नोत्येव। योगासनैः शरीरे बलसञ्चरणन्तु भवत्येव विशेषेण तु यमनियमप्राणायामादिभिर्योगविधिभिश्चित्त-संशुद्धिर्भवति। अत एव शारीरिकान् मानसिक-रोगांश्चापकर्षति योगः।**

प्राथमिक रूप से तो इनमें दक्षता को प्राप्त करके अग्रिम योगाङ्गों में श्रमकिया हुआ सावधान व्यक्ति श्रम के अनुरूप कुछ तो प्राप्त करता ही है। योगासनों के द्वारा शरीर में बलसञ्चरण तो होता ही है । विशेष रूप से तो यम, नियम और प्राणायाम इत्यादि योग की विधियों से चित्त की शुद्धि होती है अत एव शारीरिक और मानसिक रोगों को योग दूर करता है।

प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2024-26

*With best compliments from :*

Regd. Office & Works : HAMIRGARH
Distt. BHILWARA-311025 (Raj.)
Tel. : 01482-286102, 03, 05 & 06
E-mail : bhilwara@kanoria.org
Website : www.ainfrastructure.com
CIN : L25191RJ1980PLC002077
GST No.: 08AABCA7493D1ZO

**Kanoria Energy**
**& Infrastructure Limited**

(Formerly Known as A Infrastructure Limited)

**MANUFACTURER OF MAZZA AC PIPES KIRTI BRAND**

**411, IIIrd Floor, Shalimar Complex, Church Road, JAIPUR-302001 (Raj.)**
**Ph. : 0141-4019691, 2370566 • E-mail : jaipur@kanoria.org**

राष्ट्रीय विचारों के लिए पढ़ें

बात भारत की
पाञ्चजन्य
साप्ताहिक



Voice of the Nation
ORGANISER
Weekly



हमारी विशेषताएं
- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में उपलब्ध
- ई-पेपर की सुविधा

You can subscribe पाञ्चजन्य / ORGANISER weeklies online through our
Website : panchjanya.com, organiser.org

| वार्षिक ग्राहक शुल्क | पाञ्चजन्य ₹1450 (साधारण डाक द्वारा) | ORGANISER ₹1450 (by ordinary post) | विदेशों में $80 (विदेशों में हवाई डाक द्वारा) |
|---|---|---|---|

* रजिस्टर्ड डाक के लिए 1000 रुपए अतिरिक्त शुल्क

**भारत प्रकाशन (दिल्ली) लिमिटेड**
द एईस, प्लॉट नं. 4बी, डिस्ट्रिक्ट सेन्टर, मयूर विहार फेज-1 एक्सटेंशन, दिल्ली-110091 • ई-मेल : advt@bpdl.in
विज्ञापन विभाग सम्पर्क सूत्र :- 700-9696-708, 814-3232-814

स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः प्रोफेसर बनवारीलालगौडः, प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाष: २३६५७२१ पत्रसंकेत:- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाष: ०१४१-२३७९०१४

प्रतिष्ठायाम्,